AGARCHAND BHAIRODAN SETHIA
JAIN LIBRARY,
BIKANER RAJPUTANA

## PREFACE TO THE FIRST EDITION

The object of the present compilation is to provide suitable reading book for Intermediate students. The pieces have been drawn from standard works, representing a variety of styles as also of scenes and sentiments agreeable to the taste and capacity of the young readers they are intended for


* * * * *

The title of the work is अष्टपुष्पिका—a term with a classical sanction for its use, the word having occurred once in the Kādambari and twice in the Harṣacharita. The eight flowers that form the collection (both numerically and specifically) are enumerated as [illegible], [illegible], [illegible], [illegible], [illegible] and [illegible], with two others (which are [illegible] and [illegible] according to one authority and [illegible] and [illegible] according to another). The adoption is somewhat unwarranted, पुष्प ordinarily, not enjoying the same latitude of figurative use as its English equivalent 'flower.'

The expression सत्यं शिवं सुन्दरम्, which appears at the opening page of the book requires a word of explanation. It claims no upaniṣadic originality like सत्यं ज्ञानमनन्तं ब्रह्म ([illegible]), but is a literal translation, ascribed to the founder of the present day eclectic Brāhma sect, after the upaniṣadic model, of the English phrase 'The true, the good and the beautiful.' I have chosen it for the motto of my work as summing up in a nutshell the essentials of belles lettres

# अनुक्रमणिका ।

# अष्टपुष्पिका ।




## रघुदिग्विजयः ।

स राज्यं गुरुणा दत्तं प्रतिपद्याधिकं बभौ ।
दिनान्ते निहितं तेजः सवित्रेव हुताशनः ॥ १ ॥
दिलीपानन्तरं राज्ये तं निशम्य प्रतिष्ठितम् ।
पूर्वं प्रधूमितो राज्ञां हृदयेऽग्निरिवोत्थितः ॥ २ ॥
पुरुहूतध्वजस्येव तस्योन्नयनपंक्तयः ।
नवाभ्युत्थानदर्शिन्यो ननन्दुः सप्रजाः प्रजाः ॥ ३ ॥
सममेव समाक्रान्तं द्वयं द्विरदगामिना ।
तेन सिंहासनं पित्र्यमखिलं चारिमण्डलम् ॥ ४ ॥
छायामण्डललक्ष्येण तमदृश्या किल स्वयम् ।
पद्मा पद्मातपत्रेण भेजे साम्राज्यदीक्षितम् ॥ ५ ॥
परिकल्पितसान्निध्या काले काले च बन्दिषु ।
स्तुत्यं स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती ॥ ६ ॥

मनुप्रभृतिभिर्मान्यैर्भुक्ता यद्यपि राजभिः ।
तथाप्यनन्यपूर्वेव तस्मिन्नासीद्वसुन्धरा ॥ ७ ॥
स हि सर्वस्य लोकस्य युक्तदण्डतया मनः ।
आददे नातिशीतोष्णो नभस्वानिव दक्षिणः ॥ ८ ॥
मन्दोत्कण्ठाः कृतास्तेन गुणाधिकतया गुरौ ।
फलेन सहकारस्य पुष्पोद्गम इव प्रजाः ॥ ९ ॥
नयविद्भिर्नवे राज्ञि सदसच्चोपदर्शितम् ।
पूर्व एवाभवत्पक्षस्तस्मिन्नाभवदुत्तरः ॥ १० ॥
पञ्चानामपि भूतानामुत्कर्षं पुपुषुर्गुणाः ।
नवे तस्मिन्महीपाले सर्वं नवमिवाभवत् ॥ ११ ॥
यथा प्रह्लादनाच्चन्द्रः प्रतापात्तपनो यथा ।
तथैव सोऽभूदन्वर्थो राजा प्रकृतिरञ्जनात् ॥ १२ ॥
कामं कर्णान्तविश्रान्ते विशाले तस्य लोचने ।
चक्षुष्मत्ता तु शास्त्रेण सूक्ष्मकार्यार्थदर्शिना ॥ १३ ॥
लब्धप्रशमनस्वस्थमथैनं समुपस्थिता ।
पार्थिवश्रीर्द्वितीयेव शरत्पङ्कजलक्षणा ॥ १४ ॥
निर्वृष्टलघुभिर्मेघैर्मुक्तवर्त्मा सुदुःसहः ।
प्रतापस्तस्य भानोश्च युगपद्व्यानशे दिशः ॥ १५ ॥
वार्षिकं संजहारेन्द्रो धनुर्जैत्रं रघुर्दधौ ।
प्रजार्थसाधने तौ हि पर्यायोद्यतकार्मुकौ ॥ १६ ॥
पुण्डरीकातपत्रस्तं विकसत्काशचामरः ।
ऋतुर्विडम्बयामास न पुनः प्राप तच्छ्रियम् ॥ १७ ॥

प्रसादसुमुखे तस्मिंश्चन्द्रे च विशदप्रभे ।
तदा चक्षुष्मतां प्रीतिरासीत्समरसा द्वयोः ॥ १८ ॥
हंसश्रेणीषु तारासु कुमुद्वत्सु च वारिषु ।
विभूतयस्तदीयानां पर्यस्ता यशसामिव ॥ १९ ॥
इक्षुच्छायनिषादिन्यस्तस्य गोप्तुर्गुणोदयम् ।
आकुमारकथोद्घातं शालिगोप्यो जगुर्यशः ॥ २० ॥
प्रससादोदयादम्भः कुम्भयोनेर्महौजसः ।
रघोरभिभवाशङ्कि चुक्षुभे द्विषतां मनः ॥ २१ ॥
मदोदग्राः ककुद्मन्तः सरितां कूलमुद्रुजाः ।
लीलाखेलमनुप्रापुर्महोक्षास्तस्य विक्रमम् ॥ २२ ॥
प्रसवैः सप्तपर्णानां मदगन्धिभिराहताः ।
असूययेव तन्नागाः सप्तधैव प्रसुस्रुवुः ॥ २३ ॥
सरितः कुर्वती गाधाः पथश्चाश्यानकर्दमान् ।
यात्रायै चोदयामास तं शक्तेः प्रथमं शरत् ॥ २४ ॥
तस्मै सम्यग्घुतो वह्निर्वाजिनीराजनाविधौ ।
प्रदक्षिणार्चिर्व्याजेन हस्तेनेव जयं ददौ ॥ २५ ॥
स गुप्तमूलप्रत्यन्तः शुद्धपार्ष्णिरयान्वितः ।
षड्विधं बलमादाय प्रतस्थे दिग्जिगीषया ॥ २६ ॥
अवाकिरन्वयोवृद्धास्तं लाजैः पौरयोषितः ।
पृषतैर्मन्दरोद्धूतैः क्षीरोर्मय इवाच्युतम् ॥ २७ ॥
स ययौ प्रथमं प्राचीं तुल्यः प्राचीनबर्हिषा ।
अहिताननिलोद्धूतैस्तर्जयन्निव केतुभिः ॥ २८ ॥

रजोभिः स्यन्दनोद्धूतैर्गजैश्च घनसन्निभैः ।
भुवस्तलमिव व्योम कुर्वन् व्योमेव भूतलम् ॥ २९ ॥
प्रतापोऽग्रे ततः शब्दः परागस्तदनन्तरम् ।
ययौ पश्चाद्रथादीति चतुःस्कन्धेव सा चमूः ॥ ३० ॥
मरुपृष्ठान्युदम्भांसि नाव्याः सुप्रतरा नदीः ।
विपिनानि प्रकाशानि शक्तिमत्त्वाच्चकार सः ॥ ३१ ॥
स सेनां महतीं कर्षन् पूर्वसागरगामिनीम् ।
बभौ हरजटाभ्रष्टां गङ्गामिव भगीरथः ॥ ३२ ॥
त्याजितैः फलमुत्खातैर्भग्नैश्च बहुधा नृपैः ।
तस्यासीदुल्बणो मार्गः पादपैरिव दन्तिनः ॥ ३३ ॥
पौरस्त्यानेवमाक्रामंस्तांस्ताञ्जनपदाञ्जयी ।
प्राप तालीवनश्याममुपकण्ठं महोदधेः ॥ ३४ ॥
अनम्राणां समुद्धर्तुस्तस्मात्सिन्धुरयादिव ।
आत्मा संरक्षितः सुह्मैर्वृत्तिमाश्रित्य वैतसीम् ॥ ३५ ॥
वङ्गानुत्खाय तरसा नेता नौसाधनोद्यतान् ।
निचखान जयस्तम्भान् गङ्गास्रोतोऽन्तरेषु सः ॥ ३६ ॥
आपादपद्मप्रणताः कलमा इव ते रघुम् ।
फलैः संवर्धयामासुरुत्खातप्रतिरोपिताः ॥ ३७ ॥
स तीर्त्वा कपिशां सैन्यैर्बद्धद्विरदसेतुभिः ।
उत्कलादर्शितपथः कलिङ्गाभिमुखो ययौ ॥ ३८ ॥
स प्रतापं महेन्द्रस्य मूर्ध्नि तीक्ष्णं न्यवेशयत् ।
अङ्कुशं द्विरदस्येव यन्ता गम्भीरवेदिनः ॥ ३९ ॥

प्रतिजग्राह कालिङ्गस्तमस्त्रैर्गजसाधनः ।
पक्षच्छेदोद्यतं शक्रं शिलावर्षीव पर्वतः ॥ ४० ॥
द्विषां विषह्य काकुत्स्थस्तत्र नाराचदुर्दिनम् ।
सन्मङ्गलस्नात इव प्रतिपेदे जयश्रियम् ॥ ४१ ॥
ताम्बूलीनां दलैस्तत्र रचितापानभूमयः ।
नारिकेलासवं योधाः शात्रवं च पपुर्यशः ॥ ४२ ॥
गृहीतप्रतिमुक्तस्य स धर्मविजयी नृपः ।
श्रियं महेन्द्रनाथस्य जहार न तु मेदिनीम् ॥ ४३ ॥
ततो वेलातटेनैव फलवत्पूगमालिना ।
अगस्त्याचरितामाशामनाशास्यजयो ययौ ॥ ४४ ॥
स सैन्यपरिभोगेण गजदानसुगन्धिना ।
कावेरीं सरितां पत्युः शङ्कनीयामिवाकरोत् ॥ ४५ ॥
बलैरध्युषितास्तस्य विजिगीषोर्गताध्वनः ।
मारीचोद्भ्रान्तहारीता मलयाद्रेरुपत्यकाः ॥ ४६ ॥
ससञ्जुरश्वक्षुण्णानामेलानामुत्पतिष्णवः ।
तुल्यगन्धिषु मत्तेभकटेषु फलरेणवः ॥ ४७ ॥
भोगिवेष्टनमार्गेषु चन्दनानां समर्पितम् ।
नास्रसत् करिणां ग्रैवं त्रिपदीच्छेदिनामपि ॥ ४८ ॥
दिशि मन्दायते तेजो दक्षिणस्यां रवेरपि ।
तस्यामेव रघोः पाण्ड्याः प्रतापं न विषेहिरे ॥ ४९ ॥
ताम्रपर्णीसमेतस्य मुक्तासारं महोदधेः ।
ते निपत्य ददुस्तस्मै यशः स्वमिव सञ्चितम् ॥ ५० ॥

स निर्विश्य यथाकामं तटेष्वालीनचन्दनौ ।
स्तनाविव दिशस्तस्याः शैलौ मलयदर्दुरौ ॥ ५१ ॥
असह्यविक्रमः सह्यं दूरान्मुक्तमुदन्वता ।
नितम्बमिव मेदिन्याः स्रस्तांशुकमलङ्घयत् ॥ ५२ ॥
तस्यानीकैर्विसर्पद्भिरपरान्तजयोद्यतैः ।
रामास्त्रोत्सारितोऽप्यासीत् सह्यलग्न इवार्णवः ॥ ५३
भयोत्सृष्टविभूषाणां तेन केरलयोषिताम् ।
अलकेषु चमूरेणुश्चूर्णप्रतिनिधीकृतः ॥ ५४ ॥
मुरलामारुतोद्धूतमगमत्कैतकं रजः ।
तद्योधवारबाणानामयत्नपटवासताम् ॥ ५५ ॥
अभ्यभूयत वाहानां चरतां गात्रशिञ्जितैः ।
वर्मभिः पवनोद्धूतराजतालीवनध्वनिः ॥ ५६ ॥
खर्जूरीस्कन्धनद्धानां मदोद्गारसुगन्धिषु ।
कटेषु करिणां पेतुः पुंनागेभ्यः शिलीमुखाः ॥ ५७ ॥
अवकाशं किलोदन्वान्रामायाभ्यर्थितो ददौ ।
अपरान्तमहीपालव्याजेन रघवे करम् ॥ ५८ ॥
मत्तेभरदनोत्कीर्णव्यक्तविक्रमलक्षणम् ।
त्रिकूटमेव तत्रोच्चैर्जयस्तम्भं चकार सः ॥ ५९ ॥
पारसीकांस्ततो जेतुं प्रतस्थे स्थलवर्त्मना ।
इन्द्रियाख्यानिव रिपूंस्तत्त्वज्ञानेन संयमी ॥ ६० ॥
यवनीमुखपद्मानां सेहे मधुमदं न सः ।
बालातपमिवाब्जानामकालजलदोदयः ॥ ६१ ॥

सङ्ग्रामस्तुमुलस्तस्य पाश्चात्त्यैरश्वसाधनैः ।
शार्ङ्गकूजितविज्ञेयप्रतियोधे रजस्यभूत् ॥ ६२ ॥
भल्लापवर्जितैस्तेषां शिरोभिः श्मश्रुलैर्महीम् ।
तस्तार सरघाव्याप्तैः स क्षौद्रपटलैरिव ॥ ६३ ॥
अपनीतशिरस्त्राणाः शेषास्तं शरणं ययुः ।
प्रणिपातप्रतीकारः संरम्भो हि महात्मनाम् ॥ ६४ ॥
विनयन्ते स्म तद्योधा मधुभिर्विजयश्रमम् ।
आस्तीर्णाजिनरत्नासु द्राक्षावलयभूमिषु ॥ ६५ ॥
ततः प्रतस्थे कौबेरीं भास्वानिव रघुर्दिशम् ।
शरैरुस्रैरिवोदीच्यानुद्धरिष्यन् रसानिव ॥ ६६ ॥
विनीताध्वश्रमास्तस्य सिन्धुतीरविचेष्टनैः ।
दुधुवुर्वाजिनः स्कन्धांल्लग्नकुङ्कुमकेसरान् ॥ ६७ ॥
तत्र हूणावरोधानां भर्तृषु व्यक्तविक्रमम् ।
कपोलपाटलादेशि बभूव रघुचेष्टितम् ॥ ६८ ॥
काम्बोजाः समरे सोढुं तस्य वीर्यमनीश्वराः ।
गजालानपरिक्लिष्टैरक्षोटैः सार्धमानताः ॥ ६९ ॥
तेषां सदश्वभूयिष्ठास्तुङ्गा द्रविणराशयः ।
उपदा विविशुः शश्वन्नोत्सेकाः कोसलेश्वरम् ॥ ७० ॥
ततो गौरीगुरुं शैलमारुरोहाश्वसाधनः ।
वर्धयन्निव तत्कूटानुद्धूतैर्धातुरेणुभिः ॥ ७१ ॥
शशंस तुल्यसत्त्वानां सैन्यघोषेऽप्यसम्भ्रमम् ।
गुहाशयानां सिंहानां परिवृत्यावलोकितम् ॥ ७२

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेणच्छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥
सत्रान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥
ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

भूर्जेषु मर्मरीभूताः कीचकध्वनिहेतवः ।
गङ्गाशीकरिणो मार्गे मरुतस्तं सिषेविरे ॥ ७३ ॥
विशश्रमुर्नमेरूणां छायास्वध्यास्य सैनिकाः ।
दृषदो वासितोत्सङ्गा निषण्णमृगनाभिभिः ॥ ७४ ॥
सरलासक्तमातङ्गग्रैवेयस्फुरितत्विषः ।
आसन्नोषधयो नेतुर्नक्तमस्नेहदीपिकाः ॥ ७५ ॥
तस्योत्सृष्टनिवासेषु कण्ठरज्जुक्षतत्वचः ।
गजवर्ष्म किरातेभ्यः शशंसुर्देवदारवः ॥ ७६ ॥
तत्र जन्यं रघोर्घोरं पार्वतीयैर्गणैरभूत् ।
नाराचक्षेपणीयाश्मनिष्पेषोत्पतितानलम् ॥ ७७ ॥
शरैरुत्सवसङ्केतान् स कृत्वा विरतोत्सवान् ।
जयोदाहरणं बाह्वोर्गापयामास किन्नरान् ॥ ७८ ॥
परस्परेण विज्ञातस्तेषूपायनपाणिषु ।
राज्ञा हिमवतः सारो राज्ञः सारो हिमाद्रिणा ॥ ७९ ॥
तत्राक्षोभ्यं यशोराशिं निवेश्यावरुरोह सः ।
पौलस्त्यतुलितस्याद्रेरादधान इव ह्रियम् ॥ ८० ॥
चकम्पे तीर्णलौहित्ये तस्मिन् प्राग्ज्योतिषेश्वरः ।
तद्गजालानतां प्राप्तैः सह कालागुरुद्रुमैः ॥ ८१ ॥
न प्रसेहे स रुद्धार्कमधारावर्षदुर्दिनम् ।
रथवर्त्मरजोऽप्यस्य कुत एव पताकिनीम् ॥ ८२ ॥
तमीशः कामरूपाणामत्याखण्डलविक्रमम् ।
भेजे भिन्नकटैर्नागैरन्यानुपरुरोध यैः ॥ ८३ ॥

कामरूपेश्वरस्तस्य हेमपीठाधिदेवताम् ।
रत्नपुष्पोपहारेण छायामानर्च पादयोः ॥ ८४ ॥
इति जित्वा दिशो जिष्णुर्न्यवर्तत रथोद्धतम् ।
रजो विश्रामयन्राज्ञां छत्रशून्येषु मौलिषु ॥ ८५ ॥
स विश्वजितमाजह्रे यज्ञं सर्वस्वदक्षिणम् ।
आदानं हि विसर्गाय सतां वारिमुचामिव ॥ ८६ ॥
सत्रान्ते सचिवसखः पुरस्क्रियाभि-
र्गुर्वीभिः शमितपराजयव्यलीकान् ।
काकुत्स्थश्चिरविरहोत्सुकावरोधान्
राजन्यान्स्वपुरनिवृत्तयेऽनुमेने ॥ ८७ ॥
ते रेखाध्वजकुलिशातपत्रचिह्नं
सम्राजश्चरणयुगं प्रसादलभ्यम् ।
प्रस्थानप्रणतिभिरङ्गुलीषु चक्रु-
र्मौलिस्रक्च्युतमकरन्दरेणुगौरम् ॥ ८८ ॥

# रामचन्द्रवनप्रत्यावर्तनम् ।

अथात्मनः शब्दगुणं गुणज्ञः
पदं विमानेन विगाहमानः ।
रत्नाकरं वीक्ष्य मिथः स जायां
रामाभिधानो हरिरित्युवाच ॥ १ ॥

वैदेहि पश्यामलयाद्विभक्तं
मत्सेतुना फेनिलमम्बुराशिम् ।
छायापथेनेव शरत्प्रसन्नम्
आकाशमाविष्कृतचारुतारम् ॥ २ ॥

गुरोर्यियक्षोः कपिलेन मेध्ये
रसातलं संक्रमिते तुरङ्गे ।
तदर्थमुर्वीमवदारयद्भिः
पूर्वैः किलायं परिवर्धितो नः ॥ ३ ॥

गर्भं दधत्यर्कमरीचयोऽस्माद्
विवृद्धिमत्राश्नुवते वसूनि ।
अबिन्धनं वह्निमसौ बिभर्ति
प्रह्लादनं ज्योतिरजन्यनेन ॥ ४ ॥

तां तामवस्थां प्रतिपद्यमानं
स्थितं दश व्याप्य दिशो महिम्ना ।
विष्णोरिवास्यानवधारणीयम्
ईदृक्तया रूपमियत्तया वा ॥ ५ ॥

भतिमकदाम्बुदहासनेन
संस्तूयमानः प्रथमेन धाम्ना ।
अग्रे पुराणोऽपि नवोऽभिनन्द्य
संहृत्य लोकानुदयेऽधितिष्ठे ॥ ६ ॥
यस्मिन्दिशा गोत्रभिदाश्रयन्त्याः
शरत्यवर्षं शमदो महीभाः ।
भूपा इयोपस्थविनः परेन्द्रो
धर्मेश्वरं मध्यममाश्रयन्ते ॥ ७ ॥
रसातलादादिभवेन पुंसा
भुवः प्रयुक्तोद्धरणक्रियायाः ।
अस्याश्रमस्याः प्रलयप्रवृद्धं
मुहुर्निवृत्यावरणं बभूव ॥ ८ ॥
मुखार्पणेषु प्रकृतिप्रगल्भाः
स्वयं तरङ्गाधरदानदक्षः ।
अनन्यसामान्यकलत्रवृत्तिः
पिबत्यसौ पाययते च सिन्धूः ॥ ९ ॥
ससत्त्वमादाय नदीमुखाम्भः
सम्मीलयन्तो विधुतानकन्यात् ।
अमी शिरोभिस्तिमयः सरन्ध्रै-
रूर्ध्वं वितन्वन्ति जलप्रवाहान् ॥ १० ॥
मातङ्गनक्रैः सहसोत्पतद्भि-
॥ ९। भिन्नान्द्विधा पश्य समुद्रफेनान् ।

कपोलसंसर्पितया य एषां
भजन्ति कर्णक्षणचामरत्वम् ॥ ११ ॥
वेलानिलाय प्रसृता भुजङ्गा
महोर्मिविस्फूर्जथुनिर्विशेषाः ।
सूर्यांशुसम्पर्कसमृद्धरागै-
र्व्यज्यन्त एते मणिभिः फणस्थैः ॥ १२ ॥
तवाधरस्पर्धिषु विद्रुमेषु
पर्यस्तमेतत्सहसोर्मिवेगात् ।
ऊर्ध्वाङ्कुरप्रोतमुखं कथञ्चित्
क्लेशादपक्रामति शङ्खयूथम् ॥ १३ ॥
प्रवृत्तमात्रेण पयांसि पातुम्
आवर्तवेगाद्भ्रमता घनेन ।
आभाति भूयिष्ठमयं समुद्रः
प्रमथ्यमानो गिरिणेव भूयः ॥ १४ ॥
दूरादयश्चक्रनिभस्य तन्वी
तमालतालीवनराजिनीला ।
आभाति वेला लवणाम्बुराशे-
र्धारानिबद्धेव कलङ्करेखा ॥ १५ ॥
वेलानिलः केतकरेणुभिस्ते
सम्भावयत्याननमायताक्षि ।
मामक्षमं मण्डनकालहाने-
र्वेत्तीव बिम्बाधरबद्धतृष्णम् ॥ १६ ॥

एते वयं सैकतभिन्नशुक्ति-
पर्यस्तमुक्तापटलं पयोधेः ।
प्राप्ता मुहूर्तेन विमानवेगात्
कूलं फलावर्जितपूगमालम् ॥ १७ ॥

कुरुष्व तावत्करभोरु पश्चा-
न्मार्गे मृगप्रेक्षिणि दृष्टिपातम् ।
एषा विदूरीभवतः समुद्रात्
सकानना निष्पततीव भूमिः ॥ १८ ॥

क्वचित्पथा सञ्चरते सुराणां
क्वचिद् घनानां पततां क्वचिच्च ।
यथाविधो मे मनसोऽभिलाषः
प्रवर्तते पश्य तथा विमानम् ॥ १९ ॥

असौ महेन्द्रद्विपदानगन्धी
त्रिमार्गगावीचिविमर्दशीतः ।
आकाशवायुर्दिनयौवनोत्थान्
आचामति स्वेदलवान्मुखे ते ॥ २० ॥

करेण वातायनलम्बितेन
स्पृष्टस्त्वया चण्डि कुतूहलिन्या ।
आमुञ्चतीवाभरणं द्वितीयम्
उद्भिन्नविद्युद्वलयो घनस्ते ॥ २१ ॥

अमी जनस्थानमपोढविघ्नं
मत्वा समारब्धनवोटजानि ।

अध्यासते चीरभृतो यथास्वं
चिरोज्झितान्याश्रममण्डलानि ॥
सैषा स्थली यत्र विचिन्वता त्वां
भ्रष्टं मया नूपुरमेकमुर्व्याम् ।
अदृश्यत त्वच्चरणारविन्द-
विश्लेषदुःखादिव बद्धमौनम् ॥
त्वं रक्षसा भीरु यतोऽपनीता
तं मार्गमेताः कृपया लता मे ।
अदर्शयन् वक्तुमशक्नुवत्यः
शाखाभिरावर्जितपल्लवाभिः ॥ २४
मृग्यश्च दर्भाङ्कुरनिर्व्यपेक्षा-
स्तवागतिज्ञं समबोधयन्माम् ।
व्यापारयन्त्यो दिशि दक्षिणस्याम्
उत्पक्ष्मराजीनि विलोचनानि ॥ २५
एतद्गिरेर्माल्यवतः पुरस्ता-
दाविर्भवत्यम्बरलेखि शृङ्गम् ।
नवं पयो यत्र घनैर्मया च
त्वद्विप्रयोगाश्रु समं विसृष्टम् ॥ २६
गन्धश्च धाराहतपल्वलानां
कादम्बमर्धोद्गतकेशरञ्च ।
स्निग्धाश्च केकाः शिखिनां बभूवु-
र्यस्मिन्नसह्यानि विना त्वया मे ॥

पूर्वानुभूतं स्मरता च यत्र
    कम्पोत्तरं भीरु तवोपगूढम् ।
गुहाविसारीण्यतिवाहितानि
    मया कथंचिद्घनगर्जितानि ॥ २८ ॥
आसारसिक्तक्षितिबाष्पयोगा-
    न्मामक्षिणोद्यत्र विभिन्नकोशैः ।
विडम्ब्यमाना नवकन्दलैस्ते
    विवाहधूमारुणलोचनश्रीः ॥ २९ ॥
उपान्तवानीरवनोपगूढा-
    न्यालक्ष्यपारिप्लवसारसानि ।
दूरावतीर्णा पिबतीव खेदा-
    दमूनि पम्पासलिलानि दृष्टिः ॥ ३० ॥
अत्रावियुक्तानि रथाङ्गनाम्ना-
    मन्योन्यदत्तोत्पलकेसराणि ।
द्वन्द्वानि दूरान्तरवर्तिना ते
    मया प्रिये सस्पृहमीक्षितानि ॥ ३१ ॥
इमां तटाशोकलतां च तन्वीं
    स्तनाभिरामस्तबकाभिनम्राम् ।
त्वत्प्राप्तिबुद्ध्या परिरब्धुकामः
    सौमित्रिणा साश्रुरहं निषिद्धः ॥ ३२ ॥
अमूर्विमानान्तरलम्बिनीनां
    श्रुत्वा स्वनं काञ्चनकिङ्किणीनाम् ।

अभ्युद्गमज्जन्तीव समुत्पतन्त्यो
 गोदावरीसारसपङ्क्तयस्याम् ॥ ३३ ॥
एषा त्वया पेशलमप्ययापि
 यदाम्बुसंवर्धितबालचूता ।
आनन्दयत्युन्मुखरम्यसारा
 दृष्टा चिरात्पञ्चवटी मनो मे ॥ ३४ ॥
अत्रानुगोदं मृगयानिवृत्त-
 स्तापहृता नेन विमानखेदः ।
[illegible]
 स्मरामि वानीरगृहेषु सुप्तः ॥ ३५ ॥
भ्रूभेदमात्रेण पदान्मघोनः
 प्रभ्रंशयां यो नहुषं चकार ।
तस्याविलाम्भःपरिशुद्धिहेतो-
 [illegible] मुनेः [illegible] ॥ ३६ ॥
त्रेताग्नि धूमाग्रमनिन्द्यकीर्ते-
 [illegible] ।
[illegible]
 [illegible] ॥ ३७ ॥
[illegible]
 [illegible] विहाराणि ।
[illegible] विपुल-
 [illegible] ॥ ३८ ॥

पुरा स दर्भाङ्कुरमात्रवृत्ति-
श्चरन्मृगैः सार्धमृषिर्मघोना ।
समाधिभीतेन किलोपनीतः
पञ्चाप्सरोयौवनकूटबन्धम् ॥ ३९ ॥
तस्यायमन्तर्हितसौधभाजः
प्रसक्तसंगीतमृदङ्गघोषः ।
वियद्गतः पुष्पकचन्द्रशाला
क्षणं प्रतिश्रुन्मुखराः करोति ॥ ४० ॥
हविर्भुजामेधवतां चतुर्णां
मध्ये ललाटन्तपसप्तसप्तिः ।
असौ तपस्यत्यपरस्तपस्वी
नाम्ना सुतीक्ष्णश्चरितेन दान्तः ॥ ४१ ॥
अमुं सहासप्रहितेक्षणानि
व्याजार्धसन्दर्शितमेखलानि ।
नालं विकर्तुं जनितेन्द्रशङ्कं
सुराङ्गनाविभ्रमचेष्टितानि ॥ ४२ ॥
एषोऽक्षमालावलयं मृगाणां
कण्डूयितारं कुशसूचिलावम् ।
सभाजने मे भुजमूर्ध्वबाहुः
सव्येतरं प्राध्वमितः प्रयुङ्क्ते ॥ ४३ ॥
वाचंयमत्वात्प्रणतिं ममैष
कम्पेन किञ्चित् प्रतिगृह्य मूर्ध्नः ।

दृष्टिं विमानव्यवधानमुक्तां
पुनः सहस्रार्चिषि संनिधत्ते ॥ ४४ ॥
अदः शरण्यं शरभङ्गनाम्न-
स्तपोवनं पावनमाहिताग्नेः ।
चिराय संतर्प्य समिद्भिरग्निं
यो मन्त्रपूतां तनुमप्यहौषीत् ॥ ४५ ॥
छायाविनीताध्वपरिश्रमेषु
भूयिष्ठसंभाव्यफलेष्वमीषु ।
तस्यातिथीनामधुना सपर्या
स्थिता सुपुत्रेष्विव पादपेषु ॥ ४६ ॥
धारास्वनोद्गारिदरीमुखोऽसौ
शृङ्गाग्रलग्नाम्बुदवप्रपङ्कः ।
बध्नाति मे बन्धुरगात्रि चक्षु-
र्दृप्तः ककुद्मानिव चित्रकूटः ॥ ४७ ॥
एषा प्रसन्नस्तिमितप्रवाहा
सरिद्विदूरान्तरभावतन्वी ।
मन्दाकिनी भाति नगोपकण्ठे
मुक्तावली कण्ठगतेव भूमेः ॥ ४८ ॥
अयं सुजातोऽनुगिरं तमालः
प्रवालमादाय सुगन्धि यस्य ।
यवाङ्कुरापाण्डुकपोलशोभी
मयावतंसः परिकल्पितस्ते ॥ ४९ ॥

रामचन्द्रपनप्रत्यायनंनम् ।

अनिग्रहत्रासविनीतसत्त्वम्
अपुष्पलिङ्गात्फलबन्धिवृक्षम् ।
वनं तपःसाधनमेतदत्रेः
आविष्कृतोदग्रतरप्रभावम् ॥ ५० ॥

अत्राभिषेकाय तपोधनानां
सप्तर्षिहस्तोद्धृतहेमपद्माम् ।
प्रवर्तयामास किलानसूया
त्रिस्रोतसं त्र्यम्बकमौलिमालाम् ॥ ५१ ॥

वीरासनैर्ध्यानजुषामृषीणाम्
अमी समध्यासितवेदिमध्याः ।
निवातनिष्कम्पतया विभान्ति
योगाधिरूढा इव शाखिनोऽपि ॥ ५२ ॥

त्वया पुरस्तादुपयाचितो यः
सोऽयं वटः श्याम इति प्रतीतः ।
राशिर्मणीनामिव गारुडानां
सपद्मरागः फलितो विभाति ॥ ५३ ॥

क्वचित्प्रभालेपिभिरिन्द्रनीलै-
र्मुक्तामयी यष्टिरिवानुविद्धा ।
अन्यत्र माला सितपङ्कजानाम्
इन्दीवरैरुत्खचितान्तरेव ॥ ५४ ॥

क्वचित्खगानां प्रियमानसानां
कादम्बसंसर्गवतीव पङ्क्तिः ।

अन्यत्र कालागुरुदत्तपत्रा
भक्ति र्भुवश्चन्दनकल्पितेव ॥ ५५ ॥
क्वचित्प्रभा चान्द्रमसी तमोभि-
श्छायाविलीनैः शबलीकृतेव ।
अन्यत्र शुभ्रा शरदभ्रलेखा
रन्ध्रेष्विवालक्ष्यनभःप्रदेशा ॥ ५६ ॥
क्वचिच्च कृष्णोरगभूषणेव
भस्माङ्गरागा तनुरीश्वरस्य ।
पश्यानवद्याङ्गि विभाति गङ्गा
भिन्नप्रवाहा यमुनातरङ्गैः ॥ ५७ ॥
समुद्रपत्न्योर्जलसन्निपाते
पूतात्मनामत्र किलाभिषेकात् ।
तत्त्वावबोधेन विनापि भूय-
स्तनुत्यजां नास्ति शरीरबन्धः ॥ ५८ ॥
पुरं निषादाधिपतेरिदं तद्
यस्मिन्मया मौलिमणिं विहाय ।
जटासु बद्धास्वरुदत्सुमन्त्रः
कैकेयि कामाः फलितास्तवेति ॥ ५९ ॥
पयोधरैः पुण्यजनाङ्गनानां
निर्विष्टहेमाम्बुजरेणु यस्याः ।
ब्राह्मं सरः कारणमाप्तवाचो
बुद्धेरिवाव्यक्तमुदाहरन्ति ॥ ६० ॥

या तीरनिखातयूपा
वहत्ययोध्यामनु राजधानीम् ।
भावभृथावतीर्णै-
रिक्ष्वाकुभिः पुण्यतरीकृतानि ॥ ६१ ॥
कतोत्सङ्गसुखोचितानां
प्राज्यैः पयोभिः परिवर्धितानाम् ।
न्यधात्रीमिव मानसं मे
सम्भावयत्युत्तरकोशलानाम् ॥ ६२ ॥
मदीया जननीव तेन
मान्येन राज्ञा सरयूर्वियुक्ता ।
सन्तं शिशिरानिलैर्मां
तरङ्गहस्तैरुपगूहतीव ॥ ६३ ॥
कसन्ध्यामिव पिशं पुरस्ताद्
यतो रजः पार्थिवमुज्जिहीते ।
हनूमत्कथितप्रवृत्तिः
प्रत्युद्गतो मां भरतः ससैन्यः ॥ ६४ ॥
श्रियं पालितसङ्गराय
प्रत्यर्पयिष्यत्यनघां स साधुः ।
त निवृत्ताय मृधे खरादीन्
संरक्षितां त्वामिव लक्ष्मणो मे ॥ ६५ ॥
पुरस्कृत्य गुरुं पदातिः
पश्चादवस्थापितवाहिनीकः ।

वृद्धैरमात्यैः सह चीरवासा
मामर्घ्यपाणिर्भरतोऽभ्युपैति ॥
पित्रा विसृष्टां मदपेक्षया यः
श्रियं युवाप्यङ्कगतामभोक्ता ।
इयन्ति वर्षाणि तया सहोग्रम्
अभ्यस्यतीव व्रतमासिधारम्
एतावदुक्तवति दाशरथौ तदीयाम्
इच्छां विमानमधिदेवतया वि
ज्योतिष्पथादवततार सविस्मयाभि
रुद्वीक्षितं प्रकृतिभिर्भरतानुगा
तस्मात्पुरःसरविभीषणदर्शितेन
सेवाविचक्षणहरीश्वरदत्तहस्त
यानादवातरददूरमहीतलेन
मार्गेण भङ्गिरचितस्फटिकेन र
इक्ष्वाकुवंशगुरवे प्रयतः प्रणम्य
स भ्रातरं भरतमर्घ्यपरिग्रहान्ते
पर्यश्रुरस्वजत मूर्धनि चोपजघ्रौ
तद्भक्त्यपोढपितृराज्यमहाभिषे
श्मश्रुप्रवृद्धिजनिताननविक्रियांश्च
प्लक्षान्प्ररोहजटिलानिव मन्त्रिवृ
अन्वग्रहीत्प्रणमतः शुभदृष्टिपातैः
वार्तानुयोगमधुराक्षरया च वा

दृष्टाभिवन्द्यपदपद्मरजोऽस्य यं
धीमान्व यत्र चरमेषु पुरन्दरो ।
इत्यादृतेन च रिपौ रघुनन्दनेन
स्पृष्टाय लक्ष्मणगुरो भरतो ददन्दे ॥ ७२ ॥
धीरैर्मरुत्सुत तदनु वानराणां च पैतम्
उत्थाप्य सर्वमरणं भुजमालिलिङ्ग ।
स्वेन्द्रजिन्मदरजदरणं च संज्ञ
विच्छिन्नविमात्र मुखमध्यगुरु स्वजेन ॥ ७३ ॥
रामाज्ञया दशरथमुपनयन्नदानी
इन्द्रा मनुष्यवपुरादृतशोध्दान ।
तेषु स्वस्थमु वपुषा मद्यादिभ्यात
शैलाधिपेन्द्रलक्ष्मणानुमलेनिमेरे ते ॥ ७४ ॥
रामानुगाप प्रभुरपि लक्ष्मणपाला
शौर्ये ध्यानस्त्रम्भमभयानुगिरः ।
मायाविचलपाधिनेर्गप य नगरीप-
र्नं स्पष्टनेत्रगुलिनकृतकिमभनिरोभाः ॥ ७५ ॥
भूयस्ततो रघुपतिर्विमलानननाकम्
अध्यास्य कामगति मायवो विमानम् ।
देवाननं शुभपद्दरपतिसंगद्दय-
स्वागतविलसदलधिमुदिपाग्रपृन्दम् ॥ ७६ ॥
तस्येदपरेषु जगतां प्रलयादिपोर्यों
पर्यात्पर्यम प्रथमप्रथनादिपेन्द्रोः ।

नयेन [illegible] [illegible]
[illegible] पृथिवीं [illegible] ॥
[illegible] [illegible]
[illegible] गुर्वं [illegible] ।
[illegible] च [illegible]
[illegible] नयेन ॥ ७८ ॥
कौशेयं [illegible] [illegible]
[illegible] [illegible] पुष्पकेण ।
[illegible]
साकेतोपवनमुदारमध्युवास ॥ ७९ ॥

---

# पार्वती-तपश्चर्या ।

तथा समक्षं दहता मनोभवं
    पिनाकिना भग्नमनोरथा सती ।
निनिन्द रूपं हृदयेन पार्वती
    प्रियेषु सौभाग्यफला हि चारुता ॥ १ ॥
इयेष सा कर्तुमवन्ध्यरूपतां
    समाधिमास्थाय तपोभिरात्मनः ।
अवाप्यते वा कथमन्यथा द्वयं
    तथाविधं प्रेम पतिश्च तादृशः ॥ २ ॥
निशम्य चैनां तपसे कृतोद्यमां
    सुतां गिरीशप्रतिसक्तमानसाम् ।
उवाच मेना परिरभ्य वक्षसा
    निवारयन्ती महतो मुनिव्रतात् ॥ ३ ॥
मनीषिताः सन्ति गृहेषु देवताः
    तपः क्व वत्से क्व च तावकं वपुः ।
पदं सहेत भ्रमरस्य पेलवं
    शिरीषपुष्पं न पुनः पतत्रिणः ॥ ४ ॥
इति ध्रुवेच्छामनुशासती सुतां
    शशाक मेना न नियन्तुमुद्यमात् ।

तुषारवृष्टिक्षतपद्मसम्पदां
    सरोजसन्धानमिवाकरोदपाम् ॥ २७ ॥
स्वयं विशीर्णद्रुमपर्णवृत्तिता
    परा हि काष्ठा तपसस्तया पुनः ।
तदप्यपाकीर्णमतः प्रियंवदां
    वदन्त्यपर्णेति च तां पुराविदः ॥ २८ ॥
मृणालिकापेलवमेवमादिभि-
    र्व्रतैः स्वमङ्गं ग्लपयन्त्यहर्निशम् ।
तपः शरीरैः कठिनैरुपार्जितं
    तपस्विनां दूरमधश्चकार सा ॥ २९ ॥
अथाजिनाषाढधरः प्रगल्भवाग्
    ज्वलन्निव ब्रह्ममयेन तेजसा ।
विवेश कश्चिज्जटिलस्तपोवनं
    शरीरबद्धः प्रथमाश्रमो यथा ॥ ३० ॥
तमातिथेयी बहुमानपूर्वया
    सपर्यया प्रत्युदियाय पार्वती ।
भवन्ति साम्येऽपि निविष्टचेतसां
    वपुर्विशेषेष्वतिगौरवाः क्रियाः ॥ ३१ ॥
विधिप्रयुक्तां परिगृह्य सत्क्रियां
    परिश्रमं नाम विनीय च क्षणम् ।
उमां स पश्यन्नृजुनैव चक्षुषा
    प्रचक्रमे वक्तुमनुज्झितक्रमः ॥ ३२ ॥

अपि क्रियार्थं सुलभं समित्कुशं
जलान्यपि स्नानविधिक्षमाणि ते ।
अपि स्वशक्त्या तपसि प्रवर्तसे
शरीरमाद्यं खलु धर्मसाधनम् ॥ ३३ ॥

अपि त्वदावर्जितवारिसंभृतं
प्रवालमासामनुबन्धि वीरुधाम् ।
चिरोज्झितालक्तकपाटलेन ते
तुलां यदारोहति दन्तवाससा ॥ ३४ ॥

अपि प्रसन्नं हरिणेषु ते मनः
करस्थदर्भप्रणयापहारिषु ।
य उत्पलाक्षि प्रचलैर्विलोचनै-
स्तवाक्षिसादृश्यमिव प्रयुञ्जते ॥ ३५ ॥

यदुच्यते पार्वति पापवृत्तये
न रूपमित्यव्यभिचारि तद्वचः ।
तथा हि ते शीलमुदारदर्शने
तपस्विनामप्युपदेशतां गतम् ॥ ३६ ॥

विकीर्णसप्तर्षिबलिप्रहासिभि-
स्तथा न गाङ्गैः सलिलैर्दिवश्च्युतैः ।
यथा त्वदीयैश्चरितैरनाविलै-
र्महीधरः पावित एष सान्वयः ॥ ३७ ॥

अनेन धर्मः सविशेषमद्य मे
त्रिवर्गसारः प्रतिभाति भामिनि ।

करोति लक्ष्यं चिरमस्य चक्षुषो
न वक्ष्यमात्मीयमरालपक्ष्मणः ॥ ४९ ॥

कियच्चिरं श्राम्यसि गौरि विद्यते
ममापि पूर्वाश्रमसञ्चितं तपः ।
तदर्धभागेन लभस्व काङ्क्षितं
वरं तमिच्छामि च साधु वेदितुम् ॥ ५० ॥

इति प्रविश्याभिहिता द्विजन्मना
मनोगतं सा न शशाक शंसितुम् ।
अथो वयस्यां परिपार्श्ववर्तिनीं
विवर्तितानञ्जननेत्रमैक्षत ॥ ५१ ॥

सखी तदीया तमुवाच वर्णिनं
निबोध साधो तव चेत् कुतूहलम् ।
यदर्थमम्भोजमिवोष्णवारणं
कृतं तपःसाधनमेतया वपुः ॥ ५२ ॥

इयं महेन्द्रप्रभृतीनधिश्रिय-
श्चतुर्दिगीशानवमत्य मानिनी ।
अरूपहार्यं मदनस्य निग्रहात्
पिनाकपाणिं पतिमाप्तुमिच्छति ॥ ५३ ॥

असह्यहुङ्कारनिवर्तितः पुरा
पुरारिमप्राप्तमुखः शिलीमुखः ।
इमां हृदि व्यायतपातमक्षिणो-
द्विशीर्णमूर्तेरपि पुष्पधन्वनः ॥ ५४ ॥

तदा प्रभृत्युन्मदना पितुर्गृहे
ललाटिकाचन्दनधूसरालका ।
न जातु बाला लभते स्म निर्वृतिं
तुषारसंघातशिलातलेष्वपि ॥ ५५ ॥

उपात्तवर्णे चरिते पिनाकिनः
सबाष्पकण्ठस्खलितैः पदैरियम् ।
अनेकशः किंनरराजकन्यका
वनान्तसंगीतसखीररोदयत् ॥ ५६ ॥

त्रिभागशेषासु निशासु च क्षणं
निमील्य नेत्रे सहसा व्यबुध्यत ।
क्व नीलकण्ठ व्रजसीत्यलक्ष्यवा-
गसत्यकण्ठार्पितबाहुबन्धनः ॥ ५७ ॥

यदा बुधैः सर्वगतस्त्वमुच्यसे
न वेत्सि भावस्थमिमं कथं जनम् ।
इति स्वहस्तोल्लिखितश्च मुग्धया
रहस्युपालभ्यत चन्द्रशेखरः ॥ ५८ ॥

यदा च तस्याधिगमे जगत्पते-
रपश्यदन्यं न विधिं विचिन्वती ।
तदा सहास्माभिरनुज्ञया गुरो-
रियं प्रपन्ना तपसे तपोवनम् ॥ ५९ ॥

द्रुमेषु सख्या कृतजन्मसु स्वयं
फलं तपःसाक्षिषु दृष्टमेष्वपि ।

अवस्तुनिर्बन्धपरे कथं नु ते
करोऽयमामुक्तविवाहकौतुकः ।
करेण शम्भोर्वलयीकृताहिना
सहिष्यते तत्प्रथमावलम्बनम् ॥ ६६ ॥

त्वमेव तावत् परिचिन्तय स्वयं
कदाचिदेते यदि योगमर्हतः ।
वधूदुकूलं कलहंसलक्षणं
गजाजिनं शोणितबिन्दुवर्षि च ॥ ६७ ॥

चतुष्कपुष्पप्रकरावकीर्णयोः
परोऽपि को नाम तवानुमन्यते ।
अलक्तकाङ्कानि पदानि पादयो-
र्विकीर्णकेशासु परेतभूमिषु ॥ ६८ ॥

अयुक्तरूपं किमतः परं वद
त्रिनेत्रवक्षः सुलभं तवापि यत् ।
स्तनद्वयेऽस्मिन् हरिचन्दनास्पदे
पदं चिताभस्मरजः करिष्यति ॥ ६९ ॥

इयञ्च तेऽन्या पुरतो विडम्बना
यदूढया वारणराजहार्यया ।
विलोक्य वृद्धोक्षमधिष्ठितं त्वया
महाजनः स्मेरमुखो भविष्यति ॥ ७० ॥

द्वयं गतं सम्प्रति शोचनीयतां
समागमप्रार्थनया पिनाकिनः ।

कला च सा कान्तिमती कलावत-
स्त्वमस्य लोकस्य च नेत्रकौमुदी ॥ ७१ ॥
वपुर्विरूपाक्षमलक्ष्यजन्मता
दिगम्बरत्वेन निवेदितं वसु ।
वरेषु यद् बालमृगाक्षि मृग्यते
तदस्ति किं व्यस्तमपि त्रिलोचने ॥ ७२ ॥
निवर्तयास्मादसदीप्सितान्मनः
क्व तद्विधस्त्वं क्व च पुण्यलक्षणा ।
अपेक्ष्यते साधुजनेन वैदिकी
श्मशानशूलस्य न यूपसत्क्रिया ॥ ७३ ॥
इति द्विजातौ प्रतिकूलवादिनि
प्रवेपमानाधरलक्ष्यकोपया ।
विकुञ्चितभ्रूलतमाहिते तया
विलोचने तिर्यगुपान्तलोहिते ॥ ७४ ॥
उवाच चैनं परमार्थतो हरं
न वेत्सि नूनं यत एवमात्थ माम् ।
अलोकसामान्यमचिन्त्यहेतुकं

दरिद्र एव प्रभवः स सम्पदां
    त्रिलोकनाथः पितृसद्मगोचरः ।
स भीमरूपः शिव इत्युदीर्यते
    न सन्ति याथार्थ्यविदः पिनाकिनः ॥ ७७ ॥

विभूषणोद्भासि पिनद्धभोगि वा
    गजाजिनालम्बि दुकूलधारि वा
कपालि वा स्यादथवेन्दुशेखरं
    न विश्वमूर्तेरवधार्यते वपुः ॥ ७८ ॥

तदङ्गसंसर्गमवाप्य कल्पते
    ध्रुवं चिताभस्मरजो विशुद्धये ।
तथा हि नृत्याभिनयक्रियाच्युतं
    विलिप्यते मौलिभिरम्बरौकसाम् ॥ ७९ ॥

असम्पदस्तस्य वृषेण गच्छतः
    प्रभिन्नदिग्वारणवाहनो वृषा ।
करोति पादावुपगम्य मौलिना
    विनिद्रमन्दाररजोऽरुणाङ्गुली ॥ ८० ॥

विवक्षता दोषमपि च्युतात्मना
    त्वयैकमीशं प्रति साधु भाषितम् ।
यमामनन्त्यात्मभुवोऽपि कारणं
    कथं स लक्ष्यप्रभवो भविष्यति ॥ ८१ ॥

अलं विवादेन यथा श्रुतस्त्वया
    तथाविधस्तावदशेषमस्तु सः ।

ममात्र भावैकरसं मनः स्थितं
न कामवृत्तिर्वचनीयमीक्षते ॥ ८२ ॥

निवार्यतामालि किमप्ययं बटुः
पुनर्विवक्षुः स्फुरितोत्तराधरः ।
न केवलं यो महतोऽपभाषते
शृणोति तस्मादपि यः स पापभाक् ॥ ८३ ॥

इतो गमिष्याम्यथवेति वादिनी
चचाल बाला स्तनभिन्नवल्कला ।
स्वरूपमास्थाय च तां कृतस्मितः
समाललम्बे वृषराजकेतनः ॥ ८४ ॥

तं वीक्ष्य वेपथुमती सरसाङ्गयष्टि-
र्निक्षेपणाय पदमुद्धृतमुद्वहन्ती ।
मार्गाचलव्यतिकराकुलितेव सिन्धुः
शैलाधिराजतनया न ययौ न तस्थौ ॥ ८५ ॥

अद्य प्रभृत्यवनताङ्गि तवास्मि दासः
क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमजं क्लममुत्ससर्ज
क्लेशः फलेन हि पुनर्नवतां विधत्ते ॥ ८६ ॥

# प्रस्थानकौतुकम् ।

( अथ प्रविशतः कुसुमावचयं नाटयन्त्यौ सख्यौ ) ।

नगुप्ता—प्रियंवदे, यद्यपि गान्धर्वेण विधिना निर्वृत्तकल्याणा शकुन्तला अनुरूपभर्तृगामिनी संवृत्तेति निर्वृतं मे हृदयं तथाप्येतावच्चिन्तनीयम् ।

यंवदा—कथमिव ।

नगुप्ता—अद्य स राजर्षिरिष्टिं परिसमाप्य ऋषिभिर्विसृष्ट आत्मनो नगरं प्रविश्यान्तःपुरसमागत इतोगतं वृत्तान्तं स्मरति वा न वेति ।

प्रियंवदा—विस्रब्धा भव । न तादृशा आकृतिविशेषा गुणविरोधिनो भवन्ति । तात इदानीमिमं वृत्तान्तं श्रुत्वा न जाने किं प्रतिपत्स्यत इति ।

नगुप्ता—यथाहं पश्यामि तथा तस्यानुमतं भवेत् ।

प्रियंवदा—कथमिव ।

नगुप्ता—गुणवते कन्यका प्रतिपादनीयेति प्रथमः सङ्कल्पः । तं यदि दैवमेव सम्पादयति नन्वप्रयासेन कृतार्थो गुरुजनः ।

प्रियंवदा—( पुष्पभाजनं विलोक्य ) सखि, अवचितानि बलिकर्मपर्याप्तानि कुसुमानि ।

स्खलितया गत्या प्रभ्रष्टं ममाग्रहस्तात्पुष्पभाजनम्। ( पुष्पोच्चयं रूपयति। )

(प्रविश्य) प्रियंवदा—सखि, प्रकृतिवक्रः स कस्यानुनयं प्रतिगृह्णाति। किमपि पुनः सानुक्रोशः कृतः।

अनसूया—( सस्मितम् ) तस्मिन्बह्वेतदपि। कथय।

प्रियंवदा—यदा निवर्तितुं नेच्छति तदा विज्ञापितो मया 'भगवन्, प्रथममिति प्रेक्ष्याविज्ञाततपःप्रभावस्य दुहितृजनस्य भगवतैकोऽपराधो मर्षयितव्यः' इति।

अनसूया—ततस्ततः।

प्रियंवदा—ततो 'मम वचनमन्यथा भवितुं नार्हति किन्त्वभिज्ञानाभरणदर्शनेन शापो निवर्तिष्यते' इति मन्त्रयमाण एवान्तर्हितः।

अनसूया—शक्यमिदानीमाश्वसितुम्। अस्ति तेन राजर्षिणा संप्रस्थितेन स्वनामधेयाङ्कितमङ्गुलीयकं स्मरणीयमिति स्वयं पिनद्धम्। तस्मिन्स्वाधीनोपाया शकुन्तला भविष्यति।

प्रियंवदा—सखि, एहि देवकार्यं तावदस्या निर्वर्तयावः।
( परिक्रामतः। )

प्रियंवदा—( अवलोक्य ) अनसूये, प्रेक्षस्व तावद्वामहस्तोपहितवदनाऽऽलिखितेव प्रियसखी। भर्तृगतया चिन्तया आत्मानमपि नैषा विभावयति किं पुनरागन्तुकम्।

प्रियंवदा—शृणु । इदानीं सुखशयितप्रच्छिका य

सकाशं गतास्मि ।

अनसूया—ततस्ततः ।

प्रियंवदा—तावदेनां लज्जावनतमुखीं परिष्वज्य स्वयं

काश्यपेन एवमभिनन्दितम् 'दिष्ट्या धूमाकुलि

यजमानस्य पावक एवाहुतिः पतिता । वत्से, सुशि

दत्तेव विद्या अशोचनीयासि संवृत्ता । अद्यैव ऋ

रक्षितां त्वां भर्तुः सकाशं विसर्जयामि' इति ।

अनसूया—अथ केन सूचितस्तातकाश्यपस्य वृत्तान्तः ।

प्रियंवदा—अग्निशरणं प्रविष्टस्य शरीरं विना छन्दोमय्य

अनसूया—( सविस्मयम् ) कथय ।

प्रियंवदा—दुष्यन्तेनाहितं तेजो दधानां भूतये भुवः ।

अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव ॥ ५

अनसूया—( प्रियंवदामाश्लिष्य ) सखि, प्रियं मे प्रियं

न्त्वद्यैव शकुन्तला नीयते इत्युत्कण्ठासाधारणं

तोषमनुभवामि ।

प्रियंवदा—सखि, आवां तावदुत्कण्ठां विनोदयिष्याव

तपस्विनी निर्वृता भवतु ।

अनसूया—तेन हि एतस्मिंश्चूतशाखावलम्बिते नारिकेर

एतन्निमित्तमेव कालान्तरक्षमा निक्षिप्ता मया केसरमा

तदिमां हस्तसंनिहितां कुरु । यावदहमपि मृग

तीर्थमृत्तिका दूर्वाकिसलयानीति मङ्गलसमाल

विरचयामि ।

प्रियंवदा—तथा विधत्ताम् ।

( अनसूया निष्क्रान्ता । प्रियंवदा नाट्येन सुमनसो गृह्णाति । )

( नेपथ्ये ) गौतमि, आदिश्यन्तां शार्ङ्गरवमिश्राः शकुन्तलानयनाय ।

प्रियंवदा—( कर्णं दत्त्वा ) अनसूये, त्वरस्व त्वरस्व । एते खलु हस्तिनापुरगामिन ऋषयः शब्दाय्यन्ते ।

( प्रविश्य समालम्भनहस्ता ) अनसूया—सखि, एहि गच्छावः ।

( परिक्रामतः । )

प्रियंवदा—( विलोक्य ) एषा सूर्योदय एव शिखामज्जिता प्रतीष्टनीवारहस्ताभिः स्वस्तिवाचनिकाभिस्तापसीभिरभिनन्द्यमाना शकुन्तला तिष्ठति । उपसर्पाव एनाम् ।

( उपसर्पतः । )

( ततः प्रविशति यथोद्दिष्टव्यापारासनस्था शकुन्तला । )

( शकुन्तलां प्रति ) तापसीनामन्यतमा—जाते, भर्तुर्बहुमानसूचकं महादेवीशब्दं लभस्व ।

द्वितीया—वत्से, वीरप्रसविनी भव ।

तृतीया—वत्से, भर्तुर्बहुमता भव ।

( आशिषो दत्त्वा गौतमीवर्जं निष्क्रान्ताः । )

सख्यौ—( उपसृत्य ) सखि सुखमज्जनं ते भवतु ।

शकुन्तला—स्वागतं मे सख्योः । इतो निषीदतम् ।

सख्यौ—( मङ्गलपात्राण्यादायोपविश्य ) सखि, सज्जा भव यावत्ते मङ्गलसमालम्भनं विरचयावः ।

शकुन्तला—इदमपि बहु मन्तव्यम् । दुर्लभमिदानीं मे सखीमण्डनं भविष्यति । ( बाष्पं विसृजति । )

सख्यौ—सखि, उचितं न ते मङ्गलकाले रोदितुम् । ( अश्रु प्रमृज्य नाट्येन प्रसाधयतः । )

प्रियंवदा—आभरणोचितं रूपमाश्रमसुलभैः प्रसाधनैर्विप्रकार्यते ।

( प्रविश्योपायनहस्तौ ) ऋषिकुमारकौ—इदमलङ्करणम् । अलङ्क्रियतामत्रभवती । ( सर्वा विलोक्य विस्मिताः )

गौतमी—वत्स नारद, कुत एतत् ।

प्रथमः—तातकाश्यपप्रभावात् ।

गौतमी—किं मानसी सिद्धिः ।

द्वितीयः—न खलु । श्रूयताम् । तत्रभवता वयमाज्ञप्ताः 'शकुन्तलाहेतोर्वनस्पतिभ्यः कुसुमान्याहरत' इति । तत इदानीम्—

क्षौमं केनचिदिन्दुपाण्डु तरुणा माङ्गल्यमाविष्कृतं
निष्ठ्यूतश्चरणोपरागसुभगो लाक्षारसः केनचित् ।
अन्येभ्यो वनदेवताकरतलैरापर्वभागोत्थितै-
र्दत्तान्याभरणानि तत्किसलयोद्भेदप्रतिद्वन्द्विभिः ॥ ६ ॥

प्रियंवदा—( शकुन्तलां विलोक्य ) हला, अनयाऽभ्युपपत्त्या सूचिता ते भर्तुर्गेहेऽनुभवितव्या राजलक्ष्मीः । ( शकुन्तला व्रीडां रूपयति । )

प्रथमः—गौतम, एह्येहि अभिषेकोत्तीर्णाय काश्यपाय वनस्पतिसेवां निवेदयावः ।

द्वितीयः—तथा । ( निष्क्रान्तौ । )

प्रस्थानकौतुकम् ।

वमुक्तमूरणोऽयं जनः । चित्रकर्मपरिचये-
ष्वविनियोगं कुर्वः ।
ां नैपुणम् । ( उभे नाट्येनालङ्कुरुतः ) ।
प्रविशति स्नानोत्तीर्णः काश्यपः । )

कुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
तावदीदृशमहो स्नेहादरण्यौकसः
न्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥७॥
( परिक्रामति । )

शकुन्तले, अवसितमण्डनासि । परिधेहि
युगलम् । ( शकुन्तला उत्थाय परिधत्ते । )
एष ते आनन्दपरिवाहिणा चक्षुषा परिष्वज-
गुरुरुपस्थितः । आचारं तावत् प्रतिपद्यस्व ।
सव्रीडम् ) तात, वन्दे ।
यातेरिव शर्मिष्ठा भर्तुर्बहुमता भव ।
त्वमपि सम्राजं सेव पूरुमवाप्नुहि ॥ ८ ॥
यन, वरः खल्वेष न आशीः ।
त्से, इतः सद्योहुतानग्नीन् प्रदक्षिणीकुरुष्व ।
( सर्वे परिक्रामन्ति ) ।

ऋक्छन्दसाऽऽशास्ते )
मी वेदिं परितः क्लृप्तधिष्ण्याः
समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः ।

अपघ्नन्तो दुरितं हव्यगन्धै-
वैतानास्त्वां वह्नयः पावयन्तु ॥ ९ ॥

प्रतिष्ठस्वेदानीम् । ( सदृष्टिक्षेपम् ) क्व ते शार्ङ्गरवमिश्राः

( प्रविश्य ) शिष्यः—भगवन्, इमे स्मः ।

काश्यपः—भगिन्यास्ते मार्गमादेशय ।

शार्ङ्गरवः—इत इतो भवती । ( सर्वे परिक्रामन्ति । )

काश्यपः—भो भोः संनिहितास्तपोवनतरवः,

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम् ।
आद्ये वः कुसुमप्रवृत्तिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् ॥ १० ॥

( कोकिलरवं सूचयित्वा )

अनुमतगमना शकुन्तला
तरुभिरियं वनवासबन्धुभिः ।
परभृतविरुतं कलं यतः
प्रतिवचनीकृतमेभिरात्मनः ॥ ११ ॥

( आकाशे )—

रम्यान्तरः कमलिनीहरितैः सरोभि-
श्छायाद्रुमैर्नियमितार्कमयूखतापः ।
भूयात् कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः ॥ १२ ॥

( सर्वे सविस्मयमाकर्णयन्ति । )

तमी—जाते, ज्ञातिजनस्निग्धाभिरनुमतगमनासि तपोवनदेवताभिः । प्रणम भगवतीः ।

कुन्तला—( सप्रणामं परिक्रम्य—जनान्तिकम् ) हला प्रियंवदे, नन्वार्यपुत्रदर्शनोत्सुकाया अप्याश्रमपदं परित्यजन्त्या दुःखेन मे चरणौ पुरतः प्रवर्तेते ।

यंवदा—न केवलं तपोवनविरहकातरा सख्येव । त्वया उपस्थितवियोगस्य तपोवनस्याप्यवस्थां प्रेक्षस्व तावत् ।

उद्गलितदर्भकवला मृगी परित्यक्तनर्तना शिखिनी ।
अवशीर्णपाण्डुपत्रा मुञ्चत्यश्रुभरमिव च लता ॥ १३ ॥

कुन्तला—( स्मृत्वा ) तात, लताभगिनीं वनज्योत्स्नां तावदामन्त्रयिष्ये ।

श्यपः—अवैमि ते तस्यां सोदर्यास्नेहम् । इदं तावद् दक्षिणेन ।

कुन्तला—( उपेत्य लतामालिङ्ग्य ) वनज्योत्स्ने, चूतसङ्गतापि मां प्रत्यालिङ्ग इतोगताभिः शाखाबाहाभिः । अद्यप्रभृति दूरपरिवर्तिनी ते खलु भविष्यामि ।

श्यपः—सङ्कल्पितं प्रथममेव मया तवार्थे
भर्तारमात्मसदृशं सुकृतैर्गता त्वम् ।
चूतेन संश्रितवती नवमालिकेयम्
अस्यामहं त्वयि च सम्प्रति वीतचिन्तः ॥ १४ ॥

इतः पन्थानं प्रतिपद्यस्व ।

शकुन्तला—(सख्यौ प्रति) हला, एषा द्वयोर्युवयोर्हस्ते निक्षेपः ।

[...]ता—अयं जनः कस्य हस्ते समर्पितः ( बाष्पं विहरतः

[...]पः—अनसूये, प्रियंवदे, अलं रुदित्वा । ननु भवतीभ्या

[...]स्थिरीकर्तव्या शकुन्तला । ( सर्वे परिक्रामन्ति । )

[...]तला—तात, एषा उटजपर्यन्तचारिणी गर्भमन्थरा

[...]धूर्यदा अनघप्रसवा भवति तदा मे कमपि प्रियं

[...]येतारं विसर्जयिष्यथ ।

[...]पः—नेदं विस्मरिष्यामः ।

[...]तला—( गतिभङ्गं रूपयित्वा ) को नु खल्वेष [...]

[...]जति । ( परावर्तते । )

[...]प.—वत्से,

यस्य त्वया व्रणविरोपणमिङ्गुदीनां
तैलं न्यषिच्यत मुखे कुशसूचिविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति
सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ॥ १५ ॥

[...]तला—वत्स, किं सहवासपरित्यागिनीं मामनुसरसि

अचिरप्रसूतया जनन्या विना विवर्धित एव । [...]

मया विरहितं त्वां तातश्चिन्तयिष्यति । निवर्तस्व तावत्

( रुदती प्रस्थिता

[...]पः—वत्से,

उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम् ।
अस्मिन्नलक्षितनतोन्नतभूमिभागे
मार्गे पदानि खलु ते विषमीभवन्ति ॥ १६ ॥

शार्ङ्गरवः—भगवन्, ओदकान्तं स्निग्धो जनोऽनुगन्तव्य इति श्रूयते। तदिदं सरस्तीरम्। अत्र सन्दिश्य प्रतिगन्तुमर्हसि।

काश्यपः—तेन हि इमां क्षीरवृक्षच्छायामाश्रयामः।

(सर्वे परिक्रम्य स्थिताः।)

काश्यपः—(आत्मगतम्) किं नु खलु तत्रभवतो दुष्यन्तस्य युक्तरूपमस्माभिः सन्देष्टव्यम्। (चिन्तयति।)

शकुन्तला—(जनान्तिकम्) हला, प्रेक्षस्व। नलिनीपत्रान्तरितमपि सहचरमपश्यन्ती आतुरा चक्रवाकी आरौति। दुष्करमहं करोमि।

अनसूया—सखि, मा एवं मन्त्रयस्व।

एषापि प्रियेण विना गमयति रजनीं विषाददीर्घतराम्।
गुरुकमपि विरहदुःखं आशाबन्धो विषादयति॥ १७॥

काश्यपः—शार्ङ्गरव, इति त्वया मद्वचनात् स राजा शकुन्तलां पुरस्कृत्य वक्तव्यः।

शार्ङ्गरवः—आज्ञापयतु भगवान्।

काश्यपः—

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलञ्चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिञ्च ताम्।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया
भाग्यायत्तमतः परं न खलु तद्वाच्यं वधूबन्धुभिः॥ १८॥

शार्ङ्गरवः—गृहीतः सन्देशः।

वित्तुम्। वत्स दुःशासन, न मेनव्यं न मेतव्य
अयमहमागतोऽस्मि। ननु सूत, प्रापय रथं तमेवो
यत्र वत्सो मे दुःशासनः।

सूतः—आयुष्मन्, अक्षमाः सम्प्रति वाहास्ते रथमुद्वोढु
(अपवार्य) मनोरथं च।

दुर्योधनः—(रथादवतीर्य सगर्वं साकूतं च) कृतं स्यन्दनग
कालातिपातेन।

सूतः—(सवैलक्ष्यं सकरुणं च) मर्षयत्वायुष्मान्।

दुर्योधनः-धिक् सूत, किं रथेन। केवलमरातिविमर्दसंघट्टसं
दुर्योधनः खल्वहम्। तद्गदामात्रसहायः समरभुवम
रामि।

सूतः—आयुष्मन्, एवमेतत्।

दुर्योधन —यद्येवं किमेवं भाषसे। पश्य।

बालस्य मे प्रकृतिदुर्ललितस्य पापः
पापं व्यवस्यति समक्षमुदायुधोऽसौ।
अस्मिन्निवारयसि किं व्यवसायिनं मां
क्रोधो न नापि करुणा न च तेऽस्ति लज्जा

सूतः—(सकरुणं पादयोर्निपत्य) एतद्विज्ञापयामि। आयु
संपूर्णप्रतिज्ञेन निवृत्तेन भवितव्यमिदानीं दुरात्मना
वृकोदरेण। अत एवं ब्रवीमि।

दुर्योधनः—(सहसा भूमौ पतन्) हा वत्स दुःशासन
मदाज्ञाविरोधितपाण्डव, हा विक्रमैकरस, हा म

दुर्ललित, हा अरातिकुलगजघटामृगेन्द्र, हा युवराज, क्वासि । प्रयच्छ मे प्रतिवचनम् । ( मोहमुपगतः । )

सूतः—राजन, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—( संज्ञां लब्ध्वा—निःश्वस्य )

मुक्तो यथेष्टमुपभोगसुखेषु नैव
त्वं लालितोऽपि हि मया न वृथाग्रजेन ।
अस्यास्तु वत्स तव हेतुरहं विपत्ते-
र्यत्कारितोऽस्यविनयं न च रक्षितोऽसि ॥४॥ (पतति)

सूतः—आयुष्मन्, समाश्वसिहि समाश्वसिहि ।

दुर्योधनः—धिक् सूत, किमनुष्ठितं भवता ।

रक्षणीयेन सततं बालेनाज्ञानुवर्तिना ।
दुःशासनेन भ्रात्राहमुपहारेण रक्षितः ॥ ५ ॥

सूतः—देव, मर्मभेदिभिरिषुनोमरशक्तिप्रासवर्षैर्महारथानामपहृतचेतनत्वादनिश्चेष्टः कृतो महाराज इत्यपहृतो मया रथः ।

दुर्योधनः—सूत, विरूपं कृतवानसि ।

तस्यैव पाण्डवपशोरनुजद्विषो मे
क्षोभैर्गदाशनिकृतैर्न वियोजितोऽस्मि ।
तामेव नाधिशयितो रुधिरार्द्रशय्यां
दौःशासनीं यदहमाशु वृकोदरो वा ॥ ६ ॥

( निःश्वस्य नभो विलोक्य ) ननु भो हतविधे, कृपाविरहित, भरतकुलविमुख,

अपि नाम भवेन्मृत्युर्न च हन्ता वृकोदरः ।

सूतः—शान्तं पापं शान्तं पापम् । महाराज, किमिदम् ।

दुर्योधनः—घातिताशेषबन्धोर्मे किं राज्येन जयेन वा ॥ ७ ॥

( ततः प्रविशति सम्भ्रान्तः पुरुषः )

पुरुषः—आर्याः, अपि नामास्मिन्नुद्देशे सार्वभौ[illegible]
इतो युष्माभिर्महाराजदुर्योधनो न वा । ( निरूप्य )
न कोऽपि प्रत्यपये । भवतु । एतेषां बद्धाश्रमिण[illegible]
पुरुषाणां समूहो दृश्यते । अत्र गत्वा प्रक्ष्यामि । ( परि[illegible]
( क्रम्य च ) कथमेते ननु स्वामिनो महाराज[illegible]
[illegible]
तत्र [illegible] भवतु । अन्यतो निरीक्ष्या[illegible]
( [illegible] ) इतो [illegible]
[illegible] दृश्यन्ते । तत्र [illegible]
[illegible] । ( [illegible] ) [illegible]
[illegible] इति । [illegible]
[illegible] । ( [illegible] ) [illegible]
[illegible]
[illegible]
[illegible] । ( [illegible] ) [illegible]
[illegible]
[illegible] । ( [illegible] ) [illegible]
[illegible]
[illegible] । [illegible]
[illegible] । [illegible]

अन्यतो गत्वा प्रक्ष्यामि। (सर्वतो विलोक्य) कथं सर्वः पर्यायस्यानुरूपं व्यसनमनुभवन्भागधेयविषमशीलतया पर्याकुलो जनः। तत्कमिदानीमत्र प्रक्ष्यामि। कं वोपालप्स्ये। भवतु। स्वयमेवात्र विचेष्यामि। (परिक्रम्य) भवतु। दैवमिदानीमुपालप्स्ये। हंहो दैव, एकादशानामक्षौहिणीनां नायको ज्येष्ठो भ्रातृशतस्य भर्ता गाङ्गेयद्रोणकृपशल्यवृषकृतवर्माश्वत्थामप्रमुखस्य राजचक्रस्य सकलपृथ्वीमण्डलैकनाथो महाराजदुर्योधनोऽप्यन्विष्यमाणोऽपि न ज्ञायते कस्मिन्नुद्देशे वर्तत इति। (विचिन्त्य निःश्वस्य च अथवा किमत्र दैवमुपालभे। तस्य खल्विदं निर्भर्त्सितविदुरवचनबीजस्यावधीरितपितामहहितोपदेशाङ्कुरस्य शकुनिप्रोत्साहनादिविरूढमूलस्य जतुगृहद्यूतविषशाखिनः संभृतचिरकालसंबद्धवैरालवालस्य पाञ्चालीकेशग्रहणकुसुमस्य फलं परिणमति। (अन्यतो विलोक्य) यथात्र विविधरत्नप्रभासंवलितसूर्यकिरणप्रसृतशक्रचापसहस्रसम्पूरितदशदिशामुखो कुलकेतुवंशो रथो दृश्यते तदहं तर्कयाम्यवश्यमेतेन महाराजदुर्योधनस्य विश्रामोद्देशेन भवितव्यम्। यावन्निरूपयामि। (उपगम्य दृष्ट्वा निःश्वस्य च) कथमेकादशानामक्षौहिणीनां नायको भूत्वा महाराजो दुर्योधनः प्राकृतपुरुष इवाश्लाघनीयायां भूमावुपविष्टस्तिष्ठति। अथवा तस्य खल्विदं पाञ्चालीकेशग्रहकुसुमस्य फलं परिणमति।

( उपसृत्य सूतं संज्ञया पृच्छति ) ।

सूतः—( दृष्ट्वा ) अये, कथं संग्रामात्सुन्दरकः प्राप्तः ।

सुन्दरकः—( उपगम्य ) जयतु जयतु महाराजः ।

दुर्योधनः—( विलोक्य ) अये सुन्दरक, कच्चित्कुशलं राजस्य ।

सुन्दरकः—देव, कुशलं शरीरमात्रकेण ।

दुर्योधनः—किं किरीटिनास्य निहता धौरेया हतः सारथिर्भग्नो वा रथः ।

सुन्दरकः—देव, न भग्नो रथः । अस्य मनोरथः ।

दुर्योधनः—किमविस्पष्टकथितैराकुलमपि पर्याकुलयसि मे हृदयम् । तदलं संभ्रमेण । अशेषतो विस्पष्टं कथ्यताम् ।

सुन्दरकः—यद्देव आज्ञापयति । देवस्य मुकुटमणिप्रभावेणापनीता मे रणप्रहारवेदना । ( सावेगं परिक्रम्य ) शृणोतु देवः । अस्तीदानीं कुमारदुःशासनवध ( इत्यर्धोक्ते मुखमाच्छाद्य शङ्कां नाटयति ) ।

सूतः—सुन्दरक, कथय । कथितमेव दैवेन ।

दुर्योधनः—कथ्यताम् । श्रुतमस्माभिः ।

सुन्दरकः—( स्वगतम् ) कथं दुःशासनवधः श्रुतो देवेन ( प्रकाशम् ) शृणोतु देवः । अथ तावत्कुमारदुःशासनवधामर्षितेन स्वामिनाङ्गराजेन कृतकुटिलभ्रुकुटीभङ्गभीषणललाटपट्टं नाविरतनिशितशिलीमुखनिशितशरधारावर्षेणाभियुक्तः स दुरात्मा दुःशासनवैरी ।

भी—ततस्ततः।

सुन्दरकः—ततो देव, उभयबलमिलद्दीप्यमानखरखुरतुरगपदातिसमुद्धूतधूलिनिकरेण पर्यस्तगजघटासंघातेन च विस्तीर्यमाणेनान्धकारेणान्धीकृतमुभयबलम्। न खलु गगनतलं लक्ष्यते।

भी—ततस्ततः।

सुन्दरकः—ततो देव, दूराकृष्टधनुर्गुणास्फालनटङ्कारेण गम्भीरभीषणेन ज्ञायते गर्जितं प्रलयजलधरेणेति।

दुर्योधन—ततस्ततः।

सुन्दरकः—ततो देव, द्वयोरपि तयोरन्योन्यसिंहनादगर्जितपिशुनं विविधपरिमुक्तप्रहरणाहतकवचसंगलितज्वलनविस्फुलिङ्गाभासुरं गम्भीरस्तनितचापजलधं प्रसरच्छरधारासहस्रवर्षि जातं समरदुर्दिनम्।

दुर्योधन—ततस्ततः।

सुन्दरकः—ततो देव, एतस्मिन्नन्तरे ज्येष्ठस्य भ्रातुः परिभवशङ्किना धनञ्जयेन वज्रनिर्घातनिर्घोषविषमरसितध्वजाग्रस्थितमहावानरस्तुरङ्गमसंवाहनव्यापृतवासुदेवशङ्खचक्रासिगदालाञ्छितचतुर्बाहुदण्ड आपूरितपाञ्चजन्यदेवदत्तारवसितप्रतिरवभरितदशदिशामुखकुहरो धावितस्तमुद्देशं रथवरः।

दुर्योधनः—ततस्ततः।

सुन्दरकः—ततो भीमसेनधनञ्जयाभ्यामभिमुखं [illegible]
ससम्भ्रममसामुक्तविमानमपभूय [illegible]
[illegible]
सारथिकस्तं देशमुपगतः कुमारवृषसेनः ।

दुर्योधनः—( सावष्टम्भम् ) ततस्ततः ।

सुन्दरकः—ततश्च देव, तेनागच्छतैव कुमारवृषसेनेन [illegible]
[illegible]रयामलस्निग्धशल्यबन्धैः [illegible]
इव तत्क्षणमुहूर्तेन शिलीमुखैः प्रच्छादितो धनञ्जयस्य [illegible]

उभौ—( सहर्षम् ) ततस्ततः ।

सुन्दरकः—ततो देव, [illegible]
धनञ्जयेनेषद्विहस्य भणितम्—'अरे रे वृषसेन, [illegible]
तावत्ते न युक्तं मम कुपितस्याभिमुखं स्थातुम् ।
पुनर्भयतो बालस्य । तद्गच्छ । अपरैः कुमारैः सह
युध्यस्व ।' एवं वाचं निशम्य [illegible]
परुषमुखमण्डलविजृम्भितभ्रूकुटीभङ्गभीषणेन
कुमारवृषसेनेन मर्मभेदकैः परुषविषमैः [illegible]
निर्भर्त्सितो गाण्डीवी बाणैर्न पुनर्दुर्वचनैः ।

दुर्योधनः—साधु वृषसेन, साधु । सुन्दरक, ततस्ततः ।

सुन्दरकः—ततो देव, [illegible]
किरीटिना [illegible]
बाणनिपातनमात्रविहितदर्शनप्रसरेण प्रस्तुतं शिक्षाबलानुरू[illegible]
किमप्याश्चर्यम् ।

सुन्दरकः—ततो देव, विरथो लूनगुणकोदण्डः [illegible] रमाधम्रतेषिद्धशरसम्पातो मण्डलानि विचरितुं [illegible] कुमारो वृषसेनः।

दुर्योधनः—( साशङ्कम् ) ततस्ततः।

सुन्दरकः—ततो देव, सुतरथविध्वंसनामर्षितेन [illegible] राजेनागणितभीमसेनाभियोगेन परिमुक्तो [illegible] शिनीपुत्राभिमारः। कुमारोऽपि [illegible] पुनरपि प्रवृत्तो धनञ्जयेन सहायोद्धुम्।

उभौ—साधु वृषसेन, साधु। ततस्ततः।

सुन्दरकः—ततो देव, भणितं च कुमारेण 'रे रे [illegible] मुखर मध्यमपाण्डव, मम शरास्तव [illegible] हिमव निपतन्ति' इति भणित्वा शरसहस्रैः [illegible] प्रच्छाद्य सिंहनादेन गर्जितुं प्रवृत्तः।

दुर्योधनः—( सविस्मयम् ) अहो बालस्य पराक्रमो [illegible] मारोऽपि। ततस्ततः।

सुन्दरकः—ततश्च देव, तं शरजालान्तरमवधूय [illegible] निशातशातमुखा शिलीमुखेन गृहीता [illegible] कनककिङ्किणीजालझङ्कारमुखरिणी [illegible] मणिदण्डनिर्मिता निशितशरासमहिमापगुणी [illegible] शरधारातुरनीरगमगोचरतोमा शक्तिर्विमुक्ता कुमार [illegible] विमुखी।

दुर्योधनः—( सविषादम् ) ततस्ततः।

दुर्योधनः—सुन्दरक, कथ्यताम्। परवचनमेतद्।

सुन्दरकः—शृणोतु देवः। 'अरे दुर्योधनप्रमुखाः कुरुबलसेनाप्रभवः, अविनयनौकर्णधार कर्ण, युष्माभिर्मम परोक्षं बहुभिर्महारथैः परिवृत्यैकाकी मम पुत्रकोऽभिमन्युर्व्यापादितः। अहं पुनर्युष्माकं प्रेक्षमाणानामेवैतं कुमारवृषसेनं सर्वलोकैकशेषं करोमि।' इति भणित्वा सगर्वमास्फालितमनेकघनगर्जितघोरमौर्वीघोषज्यं गाण्डीवम्। स्वामिना सज्जीकृतं कालपृष्ठम्।

दुर्योधनः—(सावहित्यम्) ततस्ततः।

सुन्दरकः—ततश्च देव, प्रतिपिण्डभीमसेनसमरकर्मान्ते गाण्डीविना विरचिते अङ्गराजवृषसेनरथकूलंकषे बाणनद्यौ। ताभ्यामपि ताभ्यामन्योन्यदर्शितशिक्षाविशेषाभ्यामभियुक्तः स दुराचारो मध्यमपाण्डवः।

दुर्योधनः—ततस्ततः।

सुन्दरकः—ततश्च देव, गाण्डीविना नाराचमिश्रज्वालानिर्घोभास्वरदीप्तबाणवर्षेण तथाच्छादिताः पत्रिभिर्यथा न ध्वजो न व्योमा न रथो न धरणी न तुरगा न केतुयष्टी वर्माणि न सारथिर्न तुरङ्गमा न दिशो न वीरलोकश्च लक्ष्यते।

दुर्योधनः—(सविस्मयम्) ततस्ततः।

सुन्दरकः—ततश्च देव, अतिक्रान्ते शरवर्षे क्षणमात्रं सहित मारे पाण्डवबले विमुक्ताक्रन्दं कौरवबले उत्थितो महान्कलकलो हा हतः कुमारवृषसेनो हा हत इति।

दुर्योधनः—( सबाष्पावरोधम् ) ततस्ततः ।

सुन्दरकः—ततो देव, पश्यामि कुमारं हतसारथितुरङ्गं लुनात पत्रकेतुवंशं स्वर्गप्रभ्रष्टमिव सुरकुमारमेकेनैव मर्मभेदिना शिलीमुखेन भिन्नदेहं रथमध्ये पर्यस्तम् ।

दुर्योधनः—( सास्रम् ) अहह कुमारवृषसेन । अलमतः परं श्रुत्वा । हा वत्स वृषसेन, हा मदङ्कदुर्ललित, हा गदायुद्धप्रिय, हा राधेयकुलप्ररोह,

पर्यासनेत्रमचिरोदितचन्द्रकान्तम्
उद्भिद्यमाननवयौवनरम्यशोभम् ।
प्राणापहारपरिवर्तितदृष्टि दृष्टं
कर्णेन तत्कथमिवाननपङ्कजं ते ॥ ८ ॥

सूतः—आयुष्मन्, अलमत्यन्तदुःखावेगेन ।

दुर्योधनः—सूत, पुण्यवन्तो हि दुःखभाजो भवन्ति । अस्माकं पुनः—

प्रत्यक्षं हतबन्धूनामेतत्परिभवाग्निना ।
हृदयं दह्यतेऽत्यर्थं कुतो दुःखं कुतो व्यथा ॥ ९ ॥

( मोहमुपगतः ) ।

सूतः—समाश्वसितु समाश्वसितु महाराजः । ( पटान्तेन वीजयति । )

दुर्योधनः—( लब्धसंज्ञः ) भद्र सुन्दरक, ततो वयस्येन किं प्रतिपन्नमङ्गराजेन ।

सुन्दरकः—ततश्च देव, तथाविधस्य पुत्रस्य दर्शनेन [illegible] तमश्रुजलमुज्झित्वानवेक्षितपरप्रहरणाभियोगेन

नाभियुक्तो धनञ्जयः । तं च [illegible]
तथा परिक्रामन्तं प्रेक्ष्य [illegible]
धनञ्जयस्य रथवरः ।

दुर्योधनः—ततस्ततः ।

सुन्दरकः—ततो देव, शल्येन भणितम्—'अङ्गराज, हतक्रमो भग्नकूबरस्ते रथो न योग्यो भीमार्जुनाभ्यां सह योद्धुम्' इति परिवर्तितो रथोऽपवाहितः स्वामी स्यन्दनात् प्रहारप्रकारं च समाश्वासितः । ततश्च स्वामिना सुचि-चिन्त्य परिजनेनानीतमन्यं रथं प्रेक्ष्य दीर्घं निःश्वस्य मयि दृष्टिर्निक्षिप्ता । सुन्दरक, एहीति भणितं च । ततोऽहमुपगतः स्वामिसमीपम् । ततोऽपनीय शीर्षत्राणात्पट्टिकां शरीरगलितैः शोणितबिन्दुभिर्लिखितमुखं बाणं कृत्वाभिलिख्य प्रेषितो देवस्य सन्देशः । पट्टिकामर्पयति ।
( दुर्योधनो गृहीत्वा वाचयति ) ।

'स्वस्ति, महाराजदुर्योधनं समराङ्गणात्कर्णः कण्ठे गाढमालिङ्ग्य विज्ञापयति—

अस्त्रग्रामविधौ कृती न समरेष्वन्योऽस्ति तुल्यः पुमान्
भ्रातृभ्योऽपि ममाधिकोऽयमगुणा भीताः पृथासूनवः ।
यस्मात्प्रेरितवान्स्पर्धे न च हतो दुःशासनस्तेन वा
तं दुःशासनमद्य मोचयितुं दुर्योधनं वाचय वा ॥ ॥'

दुर्योधनः—वयस्य कर्ण, किमिदं भ्रातृशतवधदुःखितं मामेवंविधवचनेन व्यथयसि । अहह सुन्दरक, कथं विस्मयोऽलङ्कृतः ।

रथः—देव, मयाप्यारम्भ पृच्छ्यते । उपनीतशरीरावरण
सान्मयभङ्गनिश्चयः पुनरपि पार्थेन सह समरं मार्गयते ।
धनः—( आवेगादासनादुत्थाय ) सूत, रथमुपनय ।
सुन्दरक, त्वमपि मद्वचनात्त्वरिततरं गत्वा वयस्यमङ्गराजं
प्रतिबोधय । अलमतिसाहसेन । अभिन्न यथायमावयोः
सङ्कल्पः । न खलु भवानेको जीवितपरित्यागाकाङ्क्षी ।
किन्तु—

हत्वा पार्थान्सलिलमशिवं बन्धुवर्गाय दत्त्वा
सुतया पाण्वं सह नृपतिभिर्मन्त्रिभिश्चारिभिश्च ।
कृत्वान्योन्यं सुचिरमपुनर्भावि गाढोपगूढं
संन्यस्यावो हततनुमिमां दुर्वहां निर्वृतौ च ॥१०॥

अथवा शोकं प्रति मया न किञ्चित्सन्देष्टव्यम् ।

वृषसेनो न ते पुत्रो न मे दुःशासनोऽनुजः ।
त्वां बोधयामि किमहं त्वं मां संस्थापयिष्यसि ॥११॥

दरकः—यद्देव आज्ञापयति । ( निष्क्रान्तः ) ।
धनः—तूर्णमेव रथमुपस्थापय ।
:—( कर्णं दत्त्वा ) देव, हेषासंवलितो नेमिध्वनिः श्रूयते ।
तथा तर्कयामि नूनं परिजनोपनीतो रथः ।
धन—सूत, गच्छ त्वं सज्जीकुरु ।
:—यदाज्ञापयति देवः । ( निष्क्रम्य पुनः प्रविशति ) ।
र्योधनः—( विलोक्य ) किमिति नारूढोऽसि ।
:—एष खलु तातोऽम्बा च सञ्जयाधिष्ठितं ·
देवस्य समीपमुपगतौ ।

सञ्जयः—तात समाश्वस, अवतरतं स्वैरं रथात् । ( उभाववतरणं नाटयतः । )

सञ्जयः—(उपसृत्य) विजयतां महाराजः । नन्वेष तातोऽम्बया सह प्राप्तः किं न पश्यति महाराजः । ( दुर्योधनो वैलक्ष्यं नाटयति । )

धृतराष्ट्रः—शल्यानि व्यपनीय कङ्कवदनैरुन्मोचिते कङ्कटे
बद्धेषु व्रणपट्टकेषु शनकैः कर्णे कृतोपाश्रयः ।
दूराविर्जितचापयाप्रणयिनीमालोकयंल्लीलया
वत्स पुत्रक वेदनेति न मया पापेन पृष्टो भवान् ॥१३॥

( धृतराष्ट्रो गान्धारी च सर्वतोऽपेत्यालिङ्गतः । )

गान्धारी—वत्स, अतिगाढप्रहारवेदनापर्याकुलस्यास्मासु सन्निहितेष्वपि न प्रसरति ते वाणी ।

धृतराष्ट्रः—वत्स दुर्योधन, किमकृतपूर्वः सम्प्रति मय्यप्ययमव्याहारः ।

गान्धारी—वत्स, यदि त्वमप्यस्मान्नालपसि तत्किं साम्प्रतं वत्सो दुःशासन आलपत्वथ दुर्मर्षणो वान्यो वा । ( रोदिति । )

दुर्योधनः—जातोऽहमप्रतिकृतानुजनाशदर्शी
तातस्य बाष्पपयसां तव चाम्ब हेतुः ।
दुर्जातमत्र विमले भरतान्वये यः
किं मां सुतक्षयकरं सुत इत्यवैषि ॥ १४ ॥

धृतराष्ट्रः—वत्स, शृणु वचनं तथाम्बाया मम च निहता-
शेषबन्धुवर्गस्य । पश्य ।

दायादा न ययोर्बलेन गणितास्तौ द्रोणभीष्मौ हतौ
कर्णस्यात्मजमग्रतः शमयतो भीतं जगत्फाल्गुनात् ।
वत्सानां निधनेन मे त्वयि रिपुः शेषप्रतिज्ञोऽधुना
मानं वैरिषु मुञ्च तात पितरावन्धाविमौ पालय ॥ १७ ॥

दुर्योधनः—समरात्प्रतिनिवृत्य किं मया कर्तव्यम् ।

गान्धारी—जात, यत्पिता ते विदुरो वा भणति ।

सञ्जयः—राजन्, एवमिदम् ।

दुर्योधनः—सञ्जय, अथाप्युपदेष्टव्यमस्ति ।

सञ्जयः—राजन्, यावत्प्राणिति तावदुपदेष्टव्यभूमिर्विजिगीषुः प्रज्ञायताम् ।

दुर्योधनः—( सक्रोधम् ) शृणुमस्तावद्वदत एव प्रज्ञावतोऽस्मान् प्रति प्रतिरूपमुपदेशम् ।

धृतराष्ट्रः—वत्स, युक्तवादिनि सञ्जये किमत्र क्रोधेन । यदि प्रकृतिमापद्यसे तदहमेव भवन्तं ब्रवीमि । श्रूयताम् ।

दुर्योधनः—कथयतु तातः ।

धृतराष्ट्रः—वत्स, किं विस्तरेण । सन्धत्तां भवानिदानीमपि युधिष्ठिरमौचित्यपणबन्धेन ।

दुर्योधनः—तात, तनयस्नेहवैक्लव्यादम्बा बालिशत्वात्सञ्जयश्च काममेवं ब्रवीतु । युष्माकमप्येवं व्यामोहः । कस्मात् प्रभवति पुत्रनाशजन्मा हृदयज्वरः । अन्यच्च । तात,

दुर्योधनः—तात, अम्ब। गच्छतं युवां ...
यावदद्यापि किञ्चिदवशिष्टं न भवति ...
मां संग्रामावतरणाय।

गान्धारी—जात, मुहूर्तं तावन्मां मन्दभाग्यां समाश्वास्य

धृतराष्ट्रः—वत्स, यद्यपि महात्मनस्तव ...
महतः शस्त्रसम्पातानामपि ...।

दुर्योधनः—प्रत्यक्षं हतबान्धवा मम परे हन्तुं न ...
कि वा तेन कृतेन वैरिणि कृते यत्र प्रकामं ...

गान्धारी—जात, एकाकी त्वम्। कस्ते साहाय्यं करिष्यति

दुर्योधनः—एकोऽहं भवतीसुतक्षयकरो मातः ...
मान्यं केवलमेतु दैवमधुना निष्पाण्डवां ...

(नेपथ्ये कलकलानन्तरम्।)

भो भो योधाः, निवेदयन्तु भवन्तः कौरवेश्वराय महत्कदनं प्रवृत्तम्। अलमप्रियश्रवणपराङ्मुखतया। कालानुरूपं प्रतिविधातव्यमिदानीम्।

तथा हि।

त्यक्तप्राजनरश्मिरङ्कितनुः पार्थाङ्कितैर्मार्गणै-
र्वाहैः स्यन्दनवर्त्मनां परिचयादाकृष्यमाणः ...
वार्तामङ्गपतेर्विलोकनजनैरावेदयन्पृच्छतां
शून्येनैव रथेन याति शिबिरं शल्यः कुरूनल्पयन् ॥

दुर्योधनः—(श्रुत्वा साशङ्कम्) आः ...
पातदारुणमुद्घोषितम्। कः कोऽत्र भोः।

( प्रविश्य सम्भ्रान्तः ) सूतः—हा, हताः स्मः । ( आत्मानं पातयति ) ।

[दु]र्योधनः—अयि, कथय ।

[धृ]तराष्ट्रसञ्जयौ—कथ्यतां कथ्यताम् ।

[सू]तः—आयुष्मन् किमन्यत् ।

शल्येन यथा शल्येन मूर्च्छितः प्रविशता जनौघोऽयम् ।
शून्यं कर्णस्य रथं मनोरथमिवाधिरूढेन ॥ २३ ॥

[दु]र्योधनः—हा वयस्य कर्ण । ( मोहमुपागतः । )

[गा]न्धारी—जात, समाश्वसिहि, समाश्वसिहि ।

[स]ञ्जयः—समाश्वसितु समाश्वसितु महाराजः ।

[धृ]तराष्ट्रः—भोः, कष्टं कष्टम् ।

भीष्मे द्रोणे च निहते च आसीदवलम्बनम् ।
वत्सस्य मे सुहृच्छूरो राधेयः सोऽप्ययं हतः ॥ २४ ॥

वत्स, समाश्वसिहि समाश्वसिहि । ननु भो हतविधे,

अन्धोऽनुभूतशतपुत्रविपत्तिदुःखः
शोच्यां दशामुपगतः सह भार्ययाहम् ।
अस्मिन्पराजितसुहृद्गुरुबन्धुवर्गे
दुर्योधनेऽपि हि कृतो भवता निरासः ॥ २५ ॥

वत्स दुर्योधन, समाश्वसिहि समाश्वसिहि । समाश्वासय तपस्विनीं मातरं च ।

[दु]र्योधनः—( लब्धसंज्ञः )

गान्धारी—जात, कतरः पुन स [illegible]

धृतराष्ट्रः—किं वा वत्स [illegible] ।

दुर्योधनः

[illegible] वा [illegible] ऽपि वा ।

[illegible] ॥ १३ ॥

( प्रविश्य [illegible] ) सूतः आयुष्मन्,

[illegible] स्वामिनस्तव ।

सर्वे—कथं कथं ।

सूतः—[illegible] ॥ १४ ॥

गान्धारी—( ससम्भ्रमम् ) जात, किमत्र प्रतिपत्तव्यम् ।

दुर्योधन —ननु सन्निहितैवेयं गदा ।

गान्धारी हा हतास्मि मन्दभागिनी ।

दुर्योधनः—अम्ब, अलमिदानीं कार्पण्येन । सञ्जय, रोप्य पितरौ शिविरं प्रतिष्ठस्व । शोकापनोदी जनः ।

धृतराष्ट्रः—वत्स, क्षणमेकं प्रतीक्षस्व यावदनयोर्मन्दबु

दुर्योधनः—तात, किमनेनोपलब्धेन ।

( ततः प्रविशतो भीमार्जुनौ । )

भीमः—भो भोः सुयोधनानुजीविनः, किमिति सम्भ्र थायथं चरन्ति भवन्तः । कथयत तावदिदमाव मनं स्वामिनस्तस्य कुरुपतेः ।

दुर्योधनः—सूत, कथय गत्वोभयोरयं तिष्ठतीति ।

तः—यथाज्ञापयति देवः । ( तावुपसृत्य ) ननु भो वृकोदरार्जुनौ, एष महाराजस्तातेनाम्बया च सह न्यग्रोधच्छायायामुपविष्टस्तिष्ठति ।

अर्जुन—आर्य, प्रसीद । न युक्तं पुत्रशोकोपपीडितौ पितरौ पुनरस्मद्दर्शनेन भृशमुद्वेजयितुम् । तद्गच्छाव ।

भीमः—मूढ, अनुल्लङ्घनीयः समुदाचारः । न युक्तमनभिवाद्य गुरून्गन्तुम् । (उपसृत्य) सञ्जय, पित्रोर्नमस्कारं श्रावय । अथवा तिष्ठ । स्वयं विश्राव्य नामधर्मणी वन्दनीया गुरवः ।

अर्जुन—( उपगम्य ) तात, अम्ब,

सकलरिपुजयाशा यत्र बद्धा सुतैस्ते
तृणमिव परिभूतो यस्य गर्वेण लोकः ।
रणशिरसि निहन्ता तस्य राधासुतस्य
प्रणमति पितरौ वां मध्यमः पाण्डवोऽयम् ॥३८॥

भीमः—चूर्णिताशेषकौरव्यः क्षीबो दुःशासनासृजा ।
भङ्क्ता सुयोधनस्योर्वोर्भीमोऽयं शिरसाञ्चति ॥३९॥

धृतराष्ट्रः—दुरात्मन् वृकोदर, न खल्विदं भवतैव केवलं सपत्नानामपकृतम् । यावत् क्षत्रं तावत्समरविजयिनो जिता हताश्च वीराः । तत्किमेवं विकत्थनाभिरस्मानुद्वेजयसि ।

भीमः—तात, अलं मन्युना ।

(नेपथ्ये)—भो भो भीमसेनार्जुनौ, एष खलु श्रीमानजातशत्रुर्देवो युधिष्ठिरः समाज्ञापयति ।

उभौ—किमाज्ञापयत्यार्यः ।

(पुनर्नेपथ्ये)—

कुर्वन्त्वाप्ता हतानां रणशिरसि नृणां
अश्रून्मिश्रं कथञ्चिद्ददतु जलममी बान्धवा
मार्गन्तां ज्ञातिदेहान्हतनरगहने
रस्तं भास्वान्प्रयातः सह रिपुभिरयं संह्रियन्तां

उभौ—यदाज्ञापयत्यार्यः । (निष्क्रान्तौ)

(नेपथ्ये)—अरे रे गाण्डीवाकर्षणबाहुशालिन्, अर्जु
क्वेदानीं गम्यते ।

कर्णक्रोधेन युष्मद्विजयि धनुरिदं त्यक्तमेतान्यहानि
प्रौढं विक्रान्तमासीद्वन इव भवतां शून्यके रणेऽस्मि
स्पर्शं स्मृत्वोत्तमाङ्गे पितुरनयजितन्यस्तदेतैर्दोषैः
कल्पाग्निः पाण्डवानां द्रुपदसुतचमूघस्मरो द्रौणिरस्मि

धृतराष्ट्रः—(आकर्ण्य सहर्षम्) वत्स दुर्योधन, द्रोणवधा
योद्दीपितक्रोधपावकः पितुरपि समधिकबलः शिक्ष
महोपमथापमश्वत्थामा प्राप्तः । तत्समुपगमनेन ताव
सम्भाव्यतां वीरः ।

गान्धारी—जात, प्रत्युद्गच्छैनं महाभागम् ।

दुर्योधनः—तात, अम्ब, किमनेनाङ्गराजवधाशंसिना वृथा
बलपराक्रमदर्पेण ।

धृतराष्ट्रः—वत्स, न खल्विदानीं काले पराक्रमवता
बाहुवीर्याणि तिरस्कारयितुमर्हसि ।

(प्रविश्य) अश्वत्थामा—विजयतां कौरवाधिपतिः ।

ः—( उत्थाय ) गुरुपुत्र, ननु आस्यताम् । ( उपवेशयति । )

अश्वत्थामा—राजन्दुर्योधन,

कर्णेन कर्णसुभगं बहु यत्तदुक्तं
यत्सङ्गरेषु विहितं विदितं त्वया तत् ।
द्रौणिस्त्वधिज्यधनुरापतितान्यमित्र-
मेषोऽधुना त्यज नृप प्रतिकारचिन्ताम् ॥४२॥

दुर्योधनः—( साभ्यसूयम् ) आचार्यपुत्र,

अवसानेऽङ्गराजस्य योद्धव्यं भवता किल ।
ममाप्यन्तं प्रतीक्षस्व कः कर्णः कः सुयोधनः ॥४३॥

अश्वत्थामा—( स्वगतम् ) कथमद्यापि स एव कर्णपक्षपातः । अस्माकं च परिभवः । ( प्रकाशम् ) राजन्कौरवेश्वर, एवं भवतु । ( निष्क्रान्तः । )

धृतराष्ट्रः—वत्स, क एष ते व्यामोहो यदस्मिन्नपि काले एवंविधस्य महाभागस्याश्वत्थाम्नो वाक्पारुष्येणापरागमुत्पादयसि ।

दुर्योधनः—किमस्याप्रियमनुक्तं वा मयोक्तम् । किं वा नेदं कोपस्थानम् । पश्य ।

अकलितमहिमानं क्षत्रियैरात्तचापैः
समरशिरसि युष्मत्प्राग्यशोभाद्विषन्तम् ।
परिवदति समक्षं मित्रमङ्गाधिराजं
मम खलु ॥

धृतराष्ट्रः—वत्स, तथापि कोऽत्र दोषः । अवसानमिदानीं भरतकुलस्य । सञ्जय, किमिदानीं करोमि मन्दभाग्यः । ( विचिन्त्य ) भवत्वेवं तावत् । सञ्जय, मद्वचनाद् ब्रूहि भारद्वाजमश्वत्थामानम् ।

स्मरति न भवान्पीतं स्तन्यं विभज्य सहामुना
मम च मृदितं क्षौमं बाल्ये त्वदङ्गविवर्तनैः ।
अनुजनिधनस्फीताच्छोकादतिप्रणयाच्च यद्
वचनविकृतिष्वस्य क्रोधो मुधा क्रियते त्वया ॥४५॥

सञ्जयः—यदाज्ञापयति तातः । ( उत्तिष्ठति । )

धृतराष्ट्रः—अपि चेदमन्यत्त्वया वक्तव्यम् ।

यन्मोचितस्तव पिता वितथेन शस्त्रं
यच्चादृशः परिभवः स तथाविधोऽभूत् ।
एतद्विचिन्त्य बलमात्मनि पौरुषं च
दुर्योधनोक्तमपहाय विधास्यसीति ॥४६॥

सञ्जयः—यदाज्ञापयति तातः । ( निष्क्रान्तः । )

दुर्योधनः—सूत, सांग्रामिकं मे रथमुपकल्पय ।

सूतः—यदाज्ञापयत्यायुष्मान् । ( निष्क्रान्तः । )

धृतराष्ट्रः—गान्धारि, इतो वयं मद्राधिपतेः शल्यस्य शिविरमेव गच्छामः । वत्स, त्वमप्येवं कुरु ।

( परिक्रम्य निष्क्रान्ताः सर्वे । )

---

बहुमागमय दण्डनीतिं कुलविद्याम् । तदर्थानुष्ठानेन चावर्जितश-क्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधिमेखलामुर्वीम्' इति ।

एतदाकर्ण्य 'स्थान एव गुरुभिरनुशिष्टम् । तथा क्रियते' इत्यन्तःपुरमविशत् । तां च वार्तां पार्थिवेन प्रमदासन्निधौ प्रसङ्गेनोदीरितामुपनिशम्य समीपोपविष्टश्चित्तानुवृत्तिकुशलः प्रसादवित्तो गीतनृत्यवाद्यादिष्वपारः पटुरयन्त्रितमुखो बहुभङ्गिविशारदः परमर्मान्वेषणपरः परिहासविता परिवाद-रुचिः पैशुन्यपण्डितः सचिवमण्डलादप्युत्कोचहारी सकल-दुर्नयोपाध्यायः कुमारसेवको विहारभद्रो नाम स्मितपूर्वं व्यज्ञापयत्—'देव, दैवानुग्रहेण यदि कश्चिद्भाजनं भवति विभूतेः, तमवश्यमस्मादुपायचित्रप्रलोभनैः कदर्थयन्तः स्वार्थं साधयन्ति धूर्ताः । तथाहि—केचित् प्रेत्य किल लभ्यैरभ्युदया-तिशयैराशामुत्पाद्य, मुण्डयित्वा शिरः, बद्ध्वा दर्भरज्जुभिः, अजिनेनाच्छाद्य, नवनीतेनोपलिप्य, अनशनं च शाययित्वा सर्वस्वं स्वीकुर्वन्ति । तेभ्योऽपि घोरतराः पाषण्डिनः पुत्रदार-शरीरजीवितान्यपि मोचयन्ति । यदि कश्चित् पटुज्ञानोऽपि नास्ति मृगतृष्णिकार्थं हस्तगतं त्यक्तुमिच्छेत् तमन्ये परिवार्याहुः—'एषामपि कालिन्दीं चार्थपञ्चलक्षमापादयेम, शस्त्राहते सर्व-शत्रून् घातयेम, एकशरीरिणमपि मर्त्यं चक्रवर्तिनं विदधीमहि, यद्यस्मदुद्दिष्टेन मार्गेणायर्यते' इति । स पुनरिमान् प्रत्याह—'कोऽसौ मार्गः' इति । पुनरिमे ब्रुवते—'ननु चतस्रो राजविद्या-स्त्रयी वार्तान्वीक्षिकी दण्डनीतिरिति । तासु तिस्रस्त्रयीवार्ता-न्वीक्षिक्यो महत्यो मन्दफलाश्च । तास्तावदासताम् । अधीष्व

तावद्दण्डनीतिम् । इयमिदानीमाचार्यविष्णुगुप्तेन मौर्यार्थे षड्भिः श्लोकसहस्रैः संक्षिप्ता । सैवेयमधीत्य सम्यगनुष्ठीयमाना यथोक्तकर्मक्षमा इति । स 'तथा' इत्यधीते शृणोति च । तथैव जरां गच्छति ।

अस्तु किल शास्त्रं शास्त्रान्तरानुबन्धि । सर्वमेव वाङ्मयमविदित्वा न तत्त्वतोऽधिगम्यते । भवतु कालेन बहुलेन वा तदर्थाधिगतिः । अधिगतशास्त्रेण चादावेव पुत्रदारमपि न विश्वास्यम् । आत्मकुक्षेरपि कृते तण्डुलैरियद्भिरियानोदनः सम्पद्यते । इयत ओदनस्य पाकार्थमियदिन्धनं पर्याप्तमिति मानोन्मानपूर्वकं देयम् । उत्थितेन च राज्ञा क्षालिताक्षालिते मुखे मुष्टिमर्धमुष्टिं वाभ्यन्तरीकृत्य कृत्स्नमायव्ययजातमह्नः प्रथमेऽष्टमे भागे श्रोतव्यम् । शृण्वत एवास्य द्विगुणमपहरन्ति तेऽध्यक्षा [illegible] हरणोपायान् सहस्रशः [illegible] विकल्पयन्ति । द्वितीयेंऽशे विपद्यमानानां प्रजानामाक्रोशादह्यमानस्य [illegible] । [illegible] । [illegible] । तृतीये स्नातुं भोक्तुं च लभते । भुक्तवत [illegible] यावदन्नपरिणाम- [illegible] । चतुर्थे हिरण्यप्रतिग्रहाय हस्तं प्रसारयन्नेवोत्तिष्ठति । पञ्चमे मन्त्रिपरिषदा सहान्तमहान- [illegible] मनुभवति । [illegible] । [illegible]

मण्डलमात्रमपि दुराराध्यं भवेत् । शास्त्रसमाश्रयो हि स... शानि सम्मानयति, यत् प्रियं वदति, तत् सर्वमपि... मित्यधिश्वासः । अविश्वास्यता हि जन्मभूमिरनर्थानां । ... यता च भयेन विना न लोकयात्रा सा लोकेन सह मित्रा । ... शास्त्रेणार्थः । स्वतन्त्रोऽपि हि मैत्री... तदनुसारेण... तदर्थाभिप्रायमनुभूयन्तो यथेष्टमिन्द्रियसुखानि । ... परिणमन्ति यतमिन्द्रियाणि ... [illegible]

[illegible]

कानाम्, पञ्चविंशतिं काञ्चनकुङ्कुमपलानाम्, प्राभृतीकृत्यानु
तैः सामन्तैः सम्मन्त्र्य तानपि स्वमनाथस्थापयत् । उत्तरेद्यु
सामन्तानां यानवास्यस्य अनन्तवर्मा नयच्छेदादभिरन्वमण
यसन्तमानुद्य तत्कोशवाहनमवशीर्णमात्माभिरक्षितमेव कृत्वा
याभ्यासं यथाबलं च विभज्य गृहीत । युष्मदनुज्ञया येन देव
दर्शनेनाहं तुष्यामि' इति शाक्यात् सर्वानुवर्ती, तेनैवामिषेण नि
चीकृतेनोत्पादितकलहः सर्वसामन्तानध्वंसयत्। 'तदीयं च सर्व
स्वयमेवाग्रसत् । यानवास्य केनचिद्दर्शनानुगृह्य प्रत्यावृत्य स
मनन्तवर्मराज्यमात्मसादकरोत् । अस्मिन्नन्तरे मन्त्रिवृद्धो व
रक्षितः कैश्चिन्मौलैः सम्भूय बालमेन भास्करवर्माणम्, अस
ज्यायसीं भगिनीं अयोदशवर्षां मञ्जुवादिनीम्, अनयोश्च मा
महादेवीं वसुन्धरामादायापसर्पन्नापदोऽस्या भाविनया दाह
रेण देहमजहात् । अस्माद्दयैर्मित्रैस्तु नीत्वा माहिष्मत्यां भर्तृद्वैम
तुराय आर्ये मित्रवर्मणेऽनपत्याय भाषन्या देव्यां दर्शितामूत् ।
चार्यामनार्योऽभ्यायन्त्ययाभ्यमन्यत। निर्भर्त्सितश्च तया सुतमिम
खण्डचारित्रा राज्याहे चिकीर्षति' इति नैर्घृण्यात्तमेन बालमभि
घांसीत् । इदं तु ज्ञात्वा देव्याहमाहूतः— तात नालीजङ्घ
जीवितानेनार्भकेण यत्र कचिदपयाय जीव । अयं च पदम
स्येनमनुसारयामि । ज्ञापय मां क्षेममवृत्तः स्वयानाम्' इति ।
अहं सकले राजकुले कथञ्चिदेनं निर्गमय्य विन्ध्याटवी
मगादिति । पादचारदुःखितं चैनमाश्वासयितुं घोरे क्वचिद्
दाभि कानिचिद् विश्रमय्य, तथापि राजपुत्रवसन्नमनीनो
दूराध्यमपासरम् । तत्रास्य दारुणपिपासापीडितस्य वारि

न स्पृशति । उदारसत्त्वममङ्गलमिव न बहु मन्यते । सुजनमनिमित्तमिव न पश्यति । अभिजातमहिमिव लङ्घयति । शूरं कण्टकमिव परिहरति । दातारं दुःस्वप्नमिव न स्मरति । विनीतं पातकिनमिव नोपसर्पति । मनस्विनमुन्मत्तमिवोपहसति । परस्परविरुद्धं चेन्द्रजालमिव दर्शयन्ती प्रकटयति जगति निजं चरितम् । तथा हि । सततमूष्माणमारोपयन्त्यपि जाड्यमुपजनयति । उन्नतिमादधानापि नीचस्वभावतामाविष्करोति । तोयराशिसम्भवापि तृष्णां संवर्धयति । ईश्वरतां दधानाप्यशिवप्रकृतित्वमातनोति । बलोपचयमाहरन्त्यपि लघिमानमापादयति । अमृतसहोदरापि कटुकविपाका । विग्रहवत्यप्यप्रत्यक्षदर्शना । पुरुषोत्तमरतापि खलजनप्रिया । रेणुमयीव स्वच्छमपि कलुषीकरोति । यथा यथा चेयं चपला दीप्यते तथा तथा दीपशिखेव कज्जलमलिनमेव कर्म केवलमुद्वमति । तथा हीयं संवर्धनवारिधारा तृष्णाविषवल्लीनां व्याधगीतिरिन्द्रियमृगाणां परामर्शधूमलेखा सच्चरितचित्राणां विभ्रमशय्या मोहदीर्घनिद्राणां निवासजीर्णवलभी धनमदपिशाचिकानां तिमिरोद्गतिः शास्त्रदृष्टीनां पुरःपताका सर्वाविनयानामुत्पत्तिनिम्नगा क्रोधावेगग्राहाणामापानभूमिर्विषयमधूनां सङ्गीतशाला भ्रूविकारनाट्यानामावासदरी दोषाशीविषाणामुत्सारणवेत्रलता सत्पुरुषव्यवहाराणामकालप्रावृड् गुणकलहंसकानां विसर्पणभूमिर्लोकापवादविस्फोटकानां प्रस्तावना कपटनाटकस्य वध्यशाला साधुभावस्य राहुजिह्वा धर्मेन्दुमण्डलस्य । न हि तं पश्यामि यो ह्यपरिचितयानया न निर्भरमुपगूढो यो वा न विप्र-

# महाश्वेता-वृत्तान्तः ।

राजपुत्र, किमनेनातिनिर्घृणहृदयाया मम मन्दभाग्याया पापाया जन्मनः प्रभृति वैराग्यवृत्तान्तेनाश्रवणीयेन श्रुतेन तथापि यदि महत्कुतूहलं तत्कथयामि । श्रूयताम् ।

एतत्प्रायेण कल्याणाभिनिवेशिनः श्रुतिविषयमापतितमेव यथा विबुधसद्मन्यप्सरसो नाम कन्यकाः सन्ति । तासां चतुर्दश कुलानि । एकं भगवतः कमलयोनेर्मनसः समुत्पन्नम् । अन्यद्वेदेभ्यः सम्भूतम् । अन्यदग्नेरुद्भूतम् । अन्यत्पवनात्प्रसूतम् । अन्यदमृतान्मथ्यमानादुत्थितम् । अन्यज्जलाज्जातम् । अन्यदर्ककिरणेभ्यो निर्गतम् । अन्यत्सोमरश्मिभ्यो निष्पतितम् । अन्यद्भूमेरुद्भूतम् । अन्यत्सौदामिनीभ्यः प्रवृत्तम् । अन्यन्मृत्युना निर्मितम् । अपरं मकरकेतुना समुत्पादितम् । अन्यत्तु दक्षस्य प्रजापतेरतिप्रभूतानां कन्यकानां मध्ये द्वे सुते मुनिररिष्टा च बभूवतुस्ताभ्यां गन्धर्वैः सह कुलद्वयं जातम् । एवमेतान्येकत्र चतुर्दश कुलानि । गन्धर्वाणां तु दक्षात्मजाद्वितयसम्भवं तदेव कुलद्वयं जातम् । अत्र मुनेस्तनयश्चित्रसेनादीनां पञ्चदशानां भ्रातृणामधिको गुणैः षोडशश्चित्ररथो नाम समुत्पन्नः । स किल सकलत्रिभुवनप्रख्यातपराक्रमो भगवता समस्तसुरमौलिमालालालितचरणनलिनेनाखण्डलेन सुहृच्छब्दोपबृंहितप्रभावः सर्वेषां गन्धर्वाणामाधिपत्यमसिलतामरीचिनिचयमे-

साहं पितृभवने बालतया कलमधुरप्रलापिनी वीणेव गन्धर्वाणामङ्कादङ्कं सञ्चरन्त्यविदितस्नेहशोकायासमनोहरं शैशवमतिनीतवती। क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन मधुमास इव नवपल्लवेन नवपल्लव इव कुसुमेन कुसुम इव मधुकरेण मधुकर इव मदेन नवयौवनेन पदम्।

अथ सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेष्वेकदाहमम्बया सह मधुमासविस्तारितशोभं प्रोत्फुल्लनवनलिनकुमुदकुवलयकह्लारमिदमच्छोदं सरः स्नातुमभ्यागमम्। अत्र च स्नानार्थमागतया भगवत्या पार्वत्या तटशिलातलेषु विलिखितानि त्र्यम्बकप्रतिबिम्बकानि वन्दमाना भ्रमरभरभुग्नगर्भकेसरजर्जरकुसुमोपहाररम्योऽयं लतामण्डपः, परभृतनखकोटिपाटितकुड्मलनालविवरविगलितमधुधारः सुपुष्पितोऽयं सहकारतरुः, उन्मदमयूरकुलकलकलभीतभुजङ्गमुक्तलता शिशिरेयं चन्दनवीथिका, विकचकुसुमपुञ्जपानसूचितवनदेवताप्रेङ्खोलनशोभनेयं लतादोला, बहलकुसुमरजःपटलमग्नकलहंसपदलेखमतिरमणीयमिदं तीरलतातलम् इति स्निग्धमनोहरतरोद्देशदर्शनलोभाक्षिप्तहृदया सह सखीजनेन व्यचरम्।

एकस्मिंश्च प्रदेशे झटिति वनानिलेनोपनीतेन निर्भरविकसितेऽपि काननेऽभिभूतान्यकुसुमपरिमलं विसर्पन्तमतिसुरभितयानुलिम्पन्तमिव तर्पयन्तमिव पूरयन्तमिव घ्राणेन्द्रियमहमहमिकया मधुकरकुलैरनुबध्यमानमनाघ्रातपूर्वममानुषलोकोचितं कुसुमगन्धमभ्यजिघ्रम्। कुतोऽयमित्युपारूढकुतूहला चाहं मुकुलितलोचना तेन कुसुमगन्धेन मधुकरीवाकृष्यमाणा कौतुक-

सरस्यभ्यधिकतरोपजातमन्मथपुरःसरहृदयसंसर्गकलहंसानि क-तिचित्पदानि गत्वा दृष्टवानासमेयसमीकृतमदनशोकविधुरं वसन्त-मिव नवयौवनम्, आत्मानुरूपेण वयसापरेण देवतार्चनकुसु-मावचयिन्यता तापसकुमारेणानुगतम्, अतिमनोहरं स्नानार्थ-मागतं मुनिकुमारकमपश्यम्।

तेन च कर्णावतंसीकृतां वसन्तदर्शनानन्दितायाः स्मित-प्रभामिव वनश्रियः, मलयमारुतागमनार्घ्याञ्जलिमिव मधुमा-सस्य, यौवनलीलामिव कुसुमलक्ष्म्याः, कृत्तिकातारास्तबकानु-कारिणीम्, अमृतबिन्दुनिस्यन्दिनीम्, अदृष्टपूर्वां कुसुममञ्जरी-मद्राक्षम्। अस्याः परिभूतान्यकुसुमामोदो नूनमयं परिमल इति मनसा निश्चित्य तं तपोधनयुवानमीक्षमाणाहमचिन्तयम्—"अहो रूपातिशयनिष्पादनोपकरणकोशस्यातीव विधातुः। यत् त्रिभुवनाद्भुतरूपसम्भारं भगवन्तं कुसुमायुधमुत्पाद्य तदाकारातिरिक्तरूपराशिरयमपरो मुनिमायामयो मकरकेतुरु-त्पादितः। मन्ये च सकलजगन्नयनानन्दकरं शशिबिम्बं विरच-यता लक्ष्मीलीलावासभवनानि कमलानि सृजता प्रजापतिना प्रथममेतद्दर्शनाकारकरणकौशलाभ्यास एव कृतः। अन्यथा किमिव हि सदृशवस्तुविरचनायां कारणम्। अलीकं चेदं यथा किल सकला कला कलावतो बहुलपक्षे क्षीयमाणस्य सु-षुम्णानाम्ना रश्मिना रविरापिबतीति। ताः खल्वस्य गभस्तयः समस्ता वपुरिदमाविशन्तीति। कुतोऽन्यथा रूपापहारिणि

मेव मार्गमागतेन गुणेनाविद्धो कर्णोत्पलतां मयोपनम्-
नमः कुसुमायुधः कुसुमासवमद इव मधुकरी मानसमकरोत्।

उन्मुषितेव मदेन विस्मृतनिमेषेण चक्षुषा ससृहमापिबन्तीव किमपि याच्यमानेव त्वदायत्तास्मीति वदन्तीवाभिमुखं हृदयमर्पयन्तीव सर्वात्मनानुप्रविशन्तीव तन्मयतामिव संमुह्यमाना मनोभवाभिभूता आपतनेऽपि शरणमिवान्वेषयन्ती, देहि हृदयेऽवकाशमिच्छन्तीमिव दर्शयन्ती, हा हा किमिदमसाम्प्रतमनभिदेशमनुरूपमाचरितमिदं मया प्रस्तुतमिति जानानाप्यनवशा करणानां, स्तम्भितेव लिखितेवोत्कीर्णेव संयतेव मूर्च्छितेव केनापि विधृतेव निष्पन्दसकलावयवा तत्कालाविर्भूतेनावस्थान्तरेणाकल्पितशिक्षितेनानाख्येयेन स्वसंवेद्येन केवलं न विभाव्यते किं तद्रूपसम्पदा किं मनसा किं मनसिजेन किमभिनवयौवनेन किमनुरागेणैवोपदिश्यमाना किमन्येनैव केनापि प्रकारेणाहमपि न जानामि कथं कथमिति तमतिचिरं व्यलोकयम्। उद्दिश्य नीयमानैश्च तत्समीपमिन्द्रियैः पुरस्तादाकृष्यमाणेव हृदयेन पृष्ठतः प्रेर्यमाणेव पुष्पधन्वना कथमपि मुक्तयत्नाप्यात्मानमधारयम्। अनन्तरं च मेऽन्तरमदनावकाशमिव दातुमाहितसन्ताना निरयुः श्वासमरुतः। स्वेदसलिललवे खातालतयागलल्लज्जा। मकरध्वजनिशितशरनिकरनिपातभयेनेवाकम्पत गात्रयष्टिः। तद्रूपातिशयं द्रष्टुमिव कुतूहलादङ्गेभ्यो निरगाद्रोमाञ्चजालकम्। अशेषतः स्वेदाम्भसा धौतचरणयुगलादिव हृदयमविशद्रागः।

आसीच्च मम मनसि—'शान्तात्मनि दूरीकृतमदन-

तस्य वस्तुनः, किं बहुना मम मन्दभाग्यदौरात्म्यादस्य चेदृशस्य क्लेशस्य विहितत्वात्, तमपि मद्विकारदर्शनापहृतधैर्यं प्रदीपमिव पवनस्तरलतामनयदनङ्गः। तदा तस्याप्यभिनवागतं मदनं प्रत्युद्गच्छन्निव रोमोद्गमः प्रादुरभवत्। मत्सकाशमभिप्रस्थितस्य मनसो मार्गमिवोपदिशद्भिः पुरः प्रवृत्तं श्वासैः। वेपथुगृहीता शतमङ्गभीतेवाकम्पत करतलगताऽक्षमाला। द्वितीयेव कर्णावसक्तकुसुममञ्जरी कपोलतलासङ्गिनी समदृश्यत स्वेदसलिलसीकरजालिका। मद्दर्शनप्रीतिविस्तारितस्य चोत्तानतारकस्य पुण्डरीकमयमिव तमुद्देशमुपदर्शयतो लोचनयुगलस्य विसर्पिभिरंशुसन्तानैर्यदृच्छयाच्छोदसलिलमपहाय विकचकुवलयवनैरिव गगनतलसमुत्पतितैररुध्यन्त दश दिशः। तया तु तस्यातिप्रकटया विकृत्या द्विगुणीकृतमदनावेशा तत्क्षणमहमवर्णनयोग्यां कामप्यवस्थामन्वभवम्। प्रान्तप्रसरा चोपसृत्य तं द्वितीयमस्य सहचरं मुनिबालकं प्रणामपूर्वकमपृच्छम्—'भगवन्, किमभिधानः कस्य चायं तपोधनयुवा। जनयति हि मे मनसि महत्कौतुकमस्याः समुत्सर्पन्नसाधारणसौरभोऽयमनाघ्रातपूर्वो गन्धः' इति। स तु मामीषद्विहस्याब्रवीत्—'बाले, किमनेन पृष्टेन प्रयोजनम्। अथ कौतुकमावेदयामि। श्रूयताम्।

अस्ति खलु सकलत्रिभुवनप्रख्यातकीर्तिरत्युदारतया सुरासुरसिद्धवृन्दवन्दितचरणयुगलो महामुनिर्दिव्यलोकनिवासी श्वेतकेतुर्नाम। तस्यायमात्मजः। पुण्डरीक इति । इयं च सुरासुरैर्मथ्यमानात् क्षीरसागरादुद्गता

ारिजातनामा पादपरत्नस्य मञ्जरी । यथा चैषा श्रुतिपथ-
मस्य श्रवणसंसर्गमासादितवती तदपि कथयामि ।
द्य चतुर्दशीति भगवन्तमम्बिकापतिं कैलासगतमुपासितु-
मरलोकान्मया सह नन्दनवनसमीपेनायमनुसरन्निर्गत्य सा-
ग्मधुमासलक्ष्मीदत्तललितहस्तावलम्बया नन्दनवनदेवतया पा-
जातकुसुममञ्जरीमिमामादाय प्रणम्याभिहितः-'भगवन्, सक-
त्रिभुवनदर्शनाभिरामायास्तवाकृतेरस्याः सदृशोऽयमलङ्कारः
साद क्रियताम् । इयमवतंसविलासदुर्ललिता समारोप्यतां
वणशिखरम् । व्रजतु सफलतां जन्म पारिजातस्य ।' इत्येव-
भिदधानां चायमात्मरूपस्तुतिवादत्रपावनमितविलोचनस्ता-
नादृत्यैव गन्तुं प्रवृत्तः । मया तु तामनुयान्तीमालोक्य
को दोषः सखे, क्रियतामस्याः प्रणयपरिग्रहः' इत्यभिधाय बला-
देयमनिच्छतोऽप्यस्य कर्णपूरीकृता । तदेतत्कार्त्स्न्येन येऽयं
ा चैव यथा चास्य श्रवणशिखरं समारूढा तत्सर्वमावेदितम् ।

इत्युक्तवति तस्मिन्स तपोधनयुवा किञ्चिदुपदर्शितस्मि-
ता मामवादीत्-'अयि कुतूहलिनि, किमनेन प्रश्नायासेन ।
यदि रुचितसुरभिपरिमला गृह्यतामियम् ।' इत्युक्त्वा समु-
पसृत्यात्मीयाच्छ्रवणादपनीय मदीये श्रवणपुटे तामकरोत् । मम
तु तत्करतलस्पर्शलाभेन तत्क्षणमपरमिव पारिजातकुसुममव-
तंसस्थाने पुलकमासीत् । स च मत्कपोलस्पर्शेन तरलीकृताङ्गु-
लिजालकात्करतलादक्षमालां गलितामपि नाज्ञासीत् । अथाहं
तामसम्प्राप्तामेव भूतलमक्षमालां गृहीत्वा सलीलं तद्भुजपाश-

तत्सम्बन्धिनालापेन शब्दमयेनापि स्पर्शगुणमिवान्तर्जनयता ध्वनिविशेषेणापि रोमोद्गमानुमितमर्यादानुप्रवेशेन मदनावेशमन्त्रेणेवापाद्यमाना तस्याः करतलादादाय तां पत्रकपट्टिकां तस्यामिमामभिलिखितामार्यामपश्यम्—

'दूरं मुक्तालतया बिसमितया विप्रलोभ्यमानो मे ।
हंस इव दर्शिताशो मानसजन्मा त्वया नीतः ॥

अनया च मे दृष्ट्या, दिङ्मोहभ्रान्त्येव प्रनष्टधर्मैना बहुलनिशयेवान्धस्य जिह्वोच्छित्त्येव मूकस्येन्द्रजालिकपिच्छिकयेवातत्त्वदर्शिनो ज्वरप्रलापप्रवृत्त्येवासम्बद्धभाषिणो दुष्टनिद्रयेव विषविह्वलस्य लोकायतिकविद्ययेवाधर्मरुचेर्मदिरयेवोन्मत्तस्य दुरावेशक्रियेव पिशाचग्रहस्य, दोषविकारोपचयः सुतरामक्रियत स्मरातुरस्य मे मनसः । येनाकुलीक्रियमाणा सरिदिव पूरेण विह्वलतामगमम् । तां च द्वितीयदर्शनेन कृतमहापुण्यामिवानुभूतसुरलोकवासामिव देवताधिष्ठितामिव लब्धवरामिव पीतामृतामिव समासादितत्रैलोक्यराज्याभिषेकामिव मन्यमाना, सततसन्निहितामपि दुर्लभदर्शनामिवातिपरिचितामप्यपूर्वामिव सादरमाभाषमाणा, पार्श्वावस्थितामपि सर्वलोकस्योपर्यवस्थितामिव पश्यन्ती, कपोलयोरलकलताभङ्गेषु च सोपग्रहं स्पृशन्ती, विपरीतमिव परिजनस्वामिसम्बन्धमुपदर्शयन्ती, 'तरलिके, कथय कथं स त्वया दृष्टः, किं किमभिहितासि तेन, कियन्तं कालमवस्थितासि तत्र, कियदनुसरन्नस्मानसावागतः' इति पुनः पुनः

वेनाव्यवधानायां भूमावेव तस्यान्तिके समुपाविशम् । अथ मुहूर्तमिव स्थित्वा किमपि विवक्षुरिव स तस्यां मत्समीपोपविष्टायां तरलिकायां चक्षुरपातयत् । अहं तु विदिताभिप्राया दृष्ट्वैव 'भगवन्, अव्यतिरिक्तेयमस्मच्छरीरादशङ्कितमभिधीयताम्' इत्यवोचम् ।

एवमुक्तश्च मया कपिञ्जलः प्रत्यवादीत्—'राजपुत्रि, किं ब्रवीमि । वागेव मे नाभिधेयविषयमवतरति त्रपया । क कन्दमूलफलाशी शान्तो वनवासनिरतो मुनिजनः । क्वायमनुपशान्तजनोचितो विषयोपभोगाभिलाषकलुषो मन्मथविविधविलासप्रसङ्गो रागप्रायः प्रपञ्चः । सर्वमेवानुपपन्नमालोकय किमारब्धं दैवेन । अयत्नेनैव खलु पञ्चशरः पराभवति जनम् । न जाने किमिदं वल्कलानां सदृशमुताहो जटानां समुचितम् । किं तपसोऽनुरूपमाहोस्विद्धर्मोपदेशाङ्गमिदम् । अपूर्वेयं विडम्बना । केवलमवश्यकथनीयमिदम् । अपर उपायो न दृश्यते । अन्या प्रतिक्रिया नोपलभ्यते । अन्यच्छरणं नालोक्यते । अन्या गतिर्नास्ति । अकथ्यमाने च महाननर्थोपनिपातो जायते । प्राणपरित्यागेनापि रक्षणीयाः सुहृदसव इति कथयामि । अस्ति भवत्याः समक्षमेव मया तथा निष्ठुरमुपदर्शितकोपेनाभिहितः । तथा चातिवाह्य परित्यज्य तस्मात्प्रदेशादुपजातमन्युरपहाय कुसुमावचयमन्यं देशमगमम् । अपयातायां भवत्यां मुहूर्तमिव स्थित्वैकाकी किमयमिदानीमाचरतीति लतान्तरितः प्रतिनिवृत्य विटपान्तरितविग्रहस्तं प्रदेशं व्यलोकयम् । यावच्च तं नाद्राक्षमा-

भीच मे मनस्येवम्—'किं नु मदनपरायत्तचित्तवृत्तिस्तामेवानुसरन्गतो भवेत्, गतायां च तस्यां लब्धचेतनो लज्जमानो न शक्नोति मे दर्शनपथमुपगन्तुम्, आहोस्विदुपेक्षितः परित्यज्य मां गतः, उतान्विष्यन्मामेव प्रदेशमन्यमितः समाश्रितः स्यात् ।' इत्येव विकल्पयन्नचिरकालमतिष्ठम् । तेन तु जन्मनः प्रभृत्यनन्यत्वेन तस्य क्षणमप्यदर्शनेन दूयमानः पुनरचिन्तयम्—'स कदाचिद्धैर्यस्खलनविलक्षः किंचिदनिष्टमपि समाचरेत् । न हि किंचिन्न क्रियते ह्रिया । तन्न युक्तमेनमेकाकिनं कर्तुम् ।' इत्यवधार्यान्वेष्टुमादरमकरवम् । अन्विष्यंश्च यथायथा नापश्यं तं तथातथा सुहृत्स्नेहकातरेण मनसा तत्तद्दोषमनेकमाशङ्कमानो लतागहनानि चन्दनवीथिका लतामण्डपान्सरःकूलानि च वीक्षमाणो निपुणमितस्ततो दत्तदृष्टिः सुचिरं व्यचरम् ।

अथैकस्मिन्सरःसमीपवर्तिनि निरन्तरतया कुसुममय इव मधुकरमय इव परभृतमय इव मयूरमय इवातिमनोहरे वसन्तजन्मभूमिभूते लतागहने शिलातलस्थानम्, उत्सृष्टसकलव्यापारतया लिखितमिवोत्कीर्णमिव स्तम्भितमिवोपरतमिव प्रसुप्तमिव योगसमाधिस्थमिव, प्रभातचन्द्रमिव पाण्डुतया परिगृहीतं, निदाघगङ्गाप्रवाहमिव कृशिमानमागतम्, अन्तर्गतानलं चन्दनविटपमिव म्लायन्तम्, अन्यमिवादृष्टपूर्वमिवापरिचितमिव जन्मान्तरमिवोपगतं रूपान्तरेणेव परिणतम्, आविष्टमिव महाभूताधिष्ठितमिव ग्रहगृहीतमिवोन्मत्तमिव परायत्तचित्तवृत्तिं परां कोटिमधिरूढं मन्मथावेशस्य, अनभिज्ञेयपूर्वाकारं तमहमद्राक्षम् ।

[illegible] । [illegible] । [illegible]

[illegible] । [illegible] । [illegible]

[illegible]

[illegible] । [illegible] वा [illegible]

[illegible] । कि करोति, [illegible]

[illegible] । [illegible]

[illegible] । [illegible]

[illegible]

[illegible] । [illegible] । [illegible]

[illegible] । [illegible] । [illegible] । [illegible]

[illegible] ।

[illegible] । [illegible]

[illegible]

तद्दर्शितयाजिनि सरोजिनीजीवितेश्वरे चक्रवाकसुहृदि सवित लोहितायमाने पश्चिमाशामुखे, हरितायमानेषु कमलवनेषु, छायमाने पूर्वदिग्भागे, पातालपङ्कलुषेण महाप्रलयजलधिरय पूरेणेव तिमिरेणावष्टभ्यमाने जीवलोके, किङ्कर्तव्यतामूढा ता तरलिकामपृच्छम्—'अयि तरलिके, कथं न पश्यसि इदमा मे हृदयमप्रतिपत्तिविह्वलानि चेन्द्रियाणि। न स्वयमप्यपि तव्यमलमसि ज्ञातुम्। उपदिशतु मे भवती यदत्र साम्प्रतम अयमेवं त्वत्समक्षमेवाभिधाय गतः कपिञ्जलः। यदि तावदित कन्यकेव विहाय लज्जामुत्सृज्य धैर्यमवमुच्य विनयमवि यित्वा जनापवादमतिक्रम्य सदाचारमुल्लङ्घ्य शीलमवगण कुलमङ्गीकृत्यायशो रागान्धवृत्तिरननुज्ञाता पित्रानुमोदि मात्रा स्वयमुपगम्य ग्राहयामि पाणिमेवं गुरुजनातिक्रमा धर्मो महान्। अथ धर्मानुरोधादितरपक्षावलम्बनद्वारेण मृ मङ्गीकरोम्येवमपि प्रथमं तावत्स्वयमागतस्य प्रथमप्रणयिनस्त भगवतः कपिञ्जलस्य प्रणयप्रसरभङ्गः, पुनरपरं यदि कद चित्तस्य जनस्य मत्कृतादाशाभङ्गात्प्राणविपत्तिरुपजायते तद मुनिजनवधजनितं महदेनो भवेत्।' इत्येवमुच्चारयन्त्यामे मय्यासन्नचन्द्रोदयजन्मना विरलविरलेनालोकेन वसन्तवन जिरिव कुसुमरजसा धूसरतां वासवी दिगयासीत्। शनैः चन्द्रदर्शनान्मन्दस्मिताया दशनप्रभेव ज्योत्स्ना निष्पतन्ती नि शाया मुखशोभामकरोत्। तदनु रसातलादवनीमवदार्यो च्छ्रता शेषफणामण्डलेनेव रजनीकरबिम्बेनाराजत रजनी। क्रमे

च सकलजीवलोकानन्दकेन समुपारूढरागेण यौवनेनेवारोहता शशिना रमणीयतामनीयत यामिनी।

अथ तं प्रत्यासन्नसमुद्रविद्रुमप्रभापाटलितमिवाभिनवोदयरागलोहितं रजनिकरमुदितं विलोक्यान्तर्ज्वलितमदनानलान्धकारितहृदया तरलिकोत्सङ्गविधृतशरीरापि मन्मथहस्तवर्तिनी चन्द्रगतनयनापि मृत्युमालोकयन्ती तत्क्षणमचिन्तयम्—'एकत्र खलु मदनमधुमासमलयमारुतप्रभृतयः समस्ताः, एकत्र चायं पापकारी चन्द्रहतको न शक्यते सोढुम्। इदमतिदुर्विषहमदनवेदनातुरं च मे हृदयम्। अस्य चोद्गमनमिदं सदाहज्वरग्रस्तस्याङ्गारस्पर्शः शीतार्तस्य तुषारपातो विषस्फोटमूर्च्छितस्य कृष्णसर्पदंशः।' इत्येवं चिन्तयन्तीमेव चन्द्रोदयोपनीता कमलवनम्लानिनिद्रेव मूर्च्छा मां निमीलितलोचनामकार्षीत्। अचिरेण च सम्भ्रान्ततरलिकोपनीताभिश्चन्दनचर्चाभिस्तालवृन्तानिलैश्चोपलब्धसंज्ञा तामेवाकुलाकुलां मुखेनेवाधिष्ठितां विषादेन ललाटविधृतचन्द्रकान्तमणिशिलाकामविच्छिन्नप्रपातजलभारान्धकारितमुखीं रुदतीं तरलिकामपश्यम्। उन्मीलितलोचनां च मां सा कृतपादप्रणामा चन्दनपङ्कार्द्रेण करयुगलेन बद्धाञ्जलिरवादीत्—'भर्तृदारिके, किं लज्जया गुरुजनापेक्षया वा। प्रसीद, प्रेषय माम्। आनयामि ते हृदयदयितं जनम्। उत्तिष्ठ स्वयं वा तत्र गम्यताम्। अतः परमसमर्थास्मि सोढुमिमं प्रबलचन्द्रोदयविजृम्भमाणोत्कलिकाजलधिमिव मकरध्वजम्।' इत्येवंवादिनीं तामवोचम्—'उन्मत्ते, किं मन्मथेन। मन्यदं सर्व-

विकल्पानपहरन्सर्वोपायदर्शनान्युत्सारयन्सर्वानन्तरायानन्तरय-
न्सर्वसन्देहानपनयन्सर्वशङ्कास्तिरस्कुर्वंल्लज्जामुन्मूलयन्स्वयमभि-
गमनलाघवदोषमापृच्छन्कालातिपातं परिहरन्नागत एव मृत्यो-
स्तस्यैव वा सकाशं नेता कुमुदबान्धवः। तदुत्तिष्ठ यथाकथञ्चि-
दनुगमनेन जीवितेन सम्भावयामि हृदयदयितमायासकारिणं
जनम्।' इत्यभिदधाना मदनमूर्च्छाखेदविह्वलैरङ्गैः कथञ्चिदव-
लम्ब्य तामेवोदतिष्ठम्। उच्चलितायाश्च मे दुर्निमित्तनिवेदकम-
स्पन्दत दक्षिणं लोचनम्। उपजातशङ्का चाचिन्तयमिदमपरं
किमप्युपस्थितं दैवेनेति।

अथ नातिदूरोद्गतेन त्रिभुवनप्रासादमहामृणालानुकारिणा सुधासलिलक्षालितानिव वदना चन्दनरसनिर्झरनिकरानिव तारका श्वेतगङ्गाप्रवाहसहस्राणीव वमतामृतसागरसूतानिवोद्गिरता चन्द्रमण्डलेन प्लाव्यमाने ज्योत्स्नया भुवनान्तराले, श्वेतद्वीप-निवासमिव सोमलोकदर्शनसुखमिवानुभवति जने, प्रतिभवन-मङ्गनाजनेन विकचकुमुदगन्धैश्चन्दनोदकैरुत्क्षिप्यमाणेषु चन्द्रो-दयार्घेषु, प्रतिकुमुदमापतन्मधुकरमण्डलासु प्रबुध्यमानासु भवनदीर्घिकाकुमुदिनीषु, शशिमणिप्रणालनिर्झरे प्रमोदमुखर-मयूरमण्डले प्रदोषसमये गृहीतविविधकुसुमताम्बूलाङ्गराग-पटवासचूर्णया तरलिकयानुगम्यमाना तेनैव [illegible] [illegible] चन्द्रमण-[illegible] नवेन च तथा [illegible] [illegible] च पारिजातमञ्जर्या नयनागतमतिमि-

यस्मिन्नवसरे स भास्वान् तस्मिन्नेव सरसः पश्चिमे तटे पुण्डरीक [illegible] लतामण्डपम् । [illegible] रणितेन च प्रथममेव मनस्याहितशङ्का तेन सुतरामपरीत-हृदयेन किमप्यनिष्टमनः कथयतेव विलापेनाकर्णयामि 'तर-लिके, किमिदम्' इति ससम्भ्रममभिदधाना वेपमानगात्रयष्टि-[illegible] ।

[illegible]

कण्ठाभरणीकृतेन च मृणालवलयेन रजनिकरकिरणपाशेनेव संयम्य लोकान्तरमुपनीयमानम्, कपिञ्जलेन मद्दर्शनादमहारण्यमित्यूर्ध्वहस्तेन द्विगुणीभूतबाष्पोद्गमेनाक्रोशता कण्ठे परिष्वक्तं तत्क्षणापक्रान्तजीवितं तमहं पापकारिणी मन्दभाग्या महाभागमद्राक्षम् ।

उद्भूतमूर्च्छान्धकारा च पातालतलमिवावतीर्णा तदा काहमगमं किमकरवं किं व्यलपमिति सर्वमेव नाज्ञासिषम् । असवश्च मे तस्मिन् क्षणे, किमतिकठिनतयास्य मूढहृदयस्य, किमनेकदुःखसहस्रसहिष्णुतया हतशरीरकस्य, किं विहितनया दीर्घशोकस्य, किं भाजनतया जन्मान्तरोपात्तस्य दुष्कृतस्य, किं दुःखदाननिपुणतया दग्धदैवस्य, किमेकान्तवामतया दुरात्मनो मन्मथहतकस्य, केन हेतुना नोदच्छ्वसन्ति स्म तदपि न जानामि । केवलमतिचिराल्लब्धचेतना दुःखभागिनी वह्नाविव पतितमसह्यशोकदह्यमानमात्मानमवनौ विचेष्टमानमपश्यम् । अश्रद्दधाना चासम्भावनीयं तत्तस्य मरणमात्मनश्च जीवितमुत्थाय 'हा हा किमिदमुपनतम्' इति मुक्तार्तनादा, 'हा अम्ब, हा तात, हा सख्यः' इति व्याहरन्ती, 'हा नाथ, जीवितनिबन्धन, आचक्ष्व क्व मामेकाकिनीमशरणामकरुणं विमुच्य यासि, पृच्छ तरलिकां त्वत्कृते मया यानुभूतावस्था, युगस-

मानो दिवसः, प्रसीद, सकृदप्यालप,

दर्शय विलोकय, पूरय मे मनोरथम्,

शरणागतास्मि

किमिति न

करोषि दयाम्, कथय किमपराद्धं किं वा नानुष्ठितं मया कस्यां वा नाज्ञायामादृतं कस्मिन्वा त्वदनुकूले नाभिरतं येन कुपितो दासजनमकारणात्परित्यज्य प्रयासि बिभेषि कौलीनात्, अलीकानुरागप्रतारणकुशलया किं वा मया वामया पापया याहमद्यापि प्राणिमि, हा हतास्मि मन्दभागिनी, कथं मे न त्वं न तातो न जननी न बन्धुवर्गो न परलोकः, धिङ्मां दुष्कृतकारिणीं यस्याः कृते तवेयमीदृशी दशा वर्तते, नास्ति मत्सदृशी नृशंसहृदया याहमेवंविधं भवन्तमुत्सृज्य गृहं गतवती, किं मे गृहेण, किमम्बया, किं वा तातेन, किं बन्धुभिः, किं परिजनेन वा, कमुपयामि शरणम्, अयि दैव दर्शय दयां विज्ञापयामि त्वां देहि दयितदक्षिणाम्, भगवति भवितव्यते, कुरु कृपां पाहि वनितामनाथाम्, भगवत्यो वनदेवताः, प्रसीदत प्रयच्छतास्य प्राणान्, अम्ब वसुन्धरे, सकललोकानुग्रहजननि रजनि, किमर्थं नानुकम्पसे, तात कैलास, शरणागतास्मि ते दर्शय दयालुताम्, इत्येतानि चान्यानि च व्याक्रोशन्ती, किमपि स्मरामि ग्रहगृहीतेवाविष्टेवोन्मत्तेव भूतोपहतेव व्यलपम्। उपर्युपरिपरिपतन्नयनजलधारानिकरप्रवाहेण विलीयमानेव द्रवतामिव नीयमाना जलाकारैरेवाम्भोमयीक्रियमाणा, प्रलापाक्षरैरपि दशनमयूखशिखरानुगततया साश्रुधारैरिव निष्पतद्भिः, शिरोरुहैरप्यविरलविगलितकुसुमतया मुक्तबाष्पजलबिन्दुनिकरैरिवाभरणैरपि प्रत्यग्रविमलमणिकिरणाश्रुणा प्ररुदितैरिवोपेता, तदङ्गे विलयायेवात्ममरणाय स्पृहयन्ती, मृतस्यापि सर्वात्मना हृदयं प्रवेष्टुमिवेच्छन्ती, करतलेन कपोलयोरारब्धचन्द्र-

श्वेतजटामूले च ललाटे निहितसरसबिसयोश्चांसयोर्मलयजरसलवलुलितकमलिनीपलाशावगुण्ठिते च हृदये परामृशन्ती, 'पुण्डरीक, निष्ठुरोऽस्येवमत्यार्तां न गणयसि माम्' इत्युपालभमाना, मुहुर्मुहुरेनमन्वनयं मुहुर्मुहुः पर्यचुम्बं मुहुर्मुहुः कण्ठे गृहीत्वा व्याक्रोशम् । 'आः पाप, त्वयापि मन्मन्यागमनकालं यावदस्यासवो न रक्षिताः' इति तामेकावलीमगर्हयम् । 'अयि भगवन्, प्रसीद प्रत्युज्जीवयैनम्' इति मुहुर्मुहुः कपिञ्जलस्य पादयोरपतम् । मुहुर्मुहुश्च तरलिकां कण्ठे गृहीत्वा प्रारुदम् । अद्यापि चिन्तयन्ती न जानामि तस्मिन्काले कुतस्तान्यचिन्तितान्यशिक्षितान्यनुपदिष्टान्यदृष्टपूर्वाणि मे हतपुण्यायाः कृपणानि चाटुसहस्राणि प्रादुरभवन्कुतस्ते प्रलापाः कुतस्तान्यतिकरुणानि वैक्लव्यरुदितानि । अन्य एव स प्रकारः । प्रलयोर्मय इवोदतिष्ठन्नन्तर्बाष्पवेगानाम् । जलयन्त्रधारामुच्चन्ताश्रुप्रवाहाणाम् । प्ररोहा इव निरगच्छन्प्रलापानाम् । शिखरशतानीवावर्धन्त दुःखानाम् । प्रसूतय इवोदपाद्यन्त मूर्छानाम् ।

ततश्च तथाभूते तस्मिन्नवस्थान्तरे मरणैकनिश्चया तद्वहु विलप्य तरलिकामवयम्—'अय्युत्तिष्ठ निष्ठुरहृदये, किंयद्रोदिषि । काष्ठान्याहृत्य विरचय चिताम् । अनुसरामि जीवितेश्वरम्' इति । अत्रान्तरे झटिति चन्द्रमण्डलविनिर्गतो गगनादवतीर्य केयूरकोटिलग्नममृतफेनपिण्डपाण्डुरं पवनतरलमंशुकोत्तरीयमाकर्षन्नुभयकर्णान्दोलितकुण्डलमणिप्रभानुरञ्जितगण्डस्थलः स्थूलमुक्ताफलतया तारागणमिव ग्रथित-

मनितारं हारमुरसा दधानो धवलदुकूलपल्लवकल्पितोष्णीषग्रन्थिग्रथितबहलनीलकुटिलकुन्तलनिकरनिचितमौलिः कुमुदकर्णपूरः कुङ्कुमपङ्कलवलाञ्छितांसदेशः कुमुदधवलदेहो महाप्रमाणः पुरुषो महापुरुषलक्षणोपेतो दिव्याकृतिः स्वच्छवारिधवलेन देहप्रभावितानेन क्षालयन्निव दिगन्तराण्यामोदिना च शरीरतः सरता शिशिरेण शीतज्वरमिव जनयताऽमृतसीकरनिकरवर्षिणा तुषारपटलेनेवानुलिम्पन्गोशीर्षचन्दनरसच्छटाभिरिवासिञ्चन्नैरावतकरपीवराभ्यां बाहुभ्यां मृणालधवलाङ्गुलिभ्यामतिशीतलस्पर्शाभ्यां तमुपरतमुत्क्षिप्य दुन्दुभिनादगम्भीरेण स्वरेण 'वत्से महाश्वेते, न परित्याज्यास्त्वया प्राणाः, पुनरपि तवानेन सह भविष्यति समागमः' इत्येवमार्द्रतः पितेवाभिधाय सहैवानेन गगनतलमुदपतत्। अहं तु तेन व्यतिकरेण सभया सविस्मया सकौतुका चोन्मुखी किमिदमिति कपिञ्जलमपृच्छम् । असौ तु ससंभ्रममदत्त्वैवोत्तरमुदतिष्ठत् । 'दुरात्मन्, क मे वयस्यमपहृत्य गच्छसि' इत्यभिधायोन्मुखः सञ्जातकोपो बध्नन्सवेगमुत्तरीयवल्कलेन परिकरमुत्पतन्तं तमेवानुसरन्नन्तरिक्षमुदगात् । पश्यन्त्या एव च मे सर्व एव ते तारागणमध्यमविशन् ।

मम तु द्वितीयेनेव प्रियतममरणेन कपिञ्जलगमनेन द्विगुणीकृतशोकायाः सुतरामदीर्यत हृदयम् । किंकर्तव्यतामूढा च तरलिकामभणम्—'अयि न जानासि किमेतद्' इति । सा तु तदवलोक्य स्त्रीस्वभावकातरा तस्मिन् क्षणे शोकमिमां विना भयेनाभिभूता वेपमानाङ्गयष्टिर्मम मरणा

धराकी विपण्णहृदया सकरुणमवादीत्—'भर्तृदारि
जानामि पापकारिणो। किं तु महदिदमाश्चर्यम्। अ
कृतिरेव पुरुषः। समाश्वासिता चानेन गच्छता सानुकम्पं
भर्तृदारिका। प्रायेण चैवंविधा दिव्याः स्वप्नेऽप्यविसंव
भवन्त्याकृतयः। किमुत साक्षात्। न चाल्पमपि विचा
कारणमस्य मिथ्याभिधाने पश्यामि। अतो युक्तं विचा
नमस्मात्प्राणपरित्यागव्यवसायान्निवर्तयितुम्। अतिमह
दमाश्वासस्थानमस्यामवस्थायाम्। अपि च तमनुस
एव कपिञ्जलः। तस्मात्कुतोऽयं को वायं किमर्थं वाने
पगतासुरुत्क्षिप्य नीतः क्व वा नीतः कस्माच्चासम्भावन
मुना पुनःसमागमाश्वासदानेन भर्तृदारिका समाश्वा
सर्वमिदमुपलभ्य जीवितं वा मरणं वा समाचरिष्यसि।
र्लभं हि मरणमध्यवसितम्। पश्चादप्येतद्भविष्यति। न जी
पिञ्जलो भर्तृदारिकामदृष्ट्वा स्थास्यति। तेन तत्प्रत्यागमन
वधयोऽपि तावद्ध्रियन्तामम्मी प्राणाः।' इत्यभिदधाना पा
में न्यपतत्। अहं तु सकललोकदुर्लङ्घ्यतया जीविततृष्ण
क्षुद्रतया च स्त्रीस्वभावस्य तया च तद्वचनोपनीतया दुराश
गतृष्णिकया कपिञ्जलप्रत्यागमनकाङ्क्षया च तस्मिन्काले
युक्तं मन्यमाना नोत्सृष्टवती जीवितम्। आशया हि किमि
क्रियते। तां च पापकारिणीं कालरात्रिप्रतिमां वर्षसहस्र
माणां यातनामयीमिव दुःखमयीमिव नरकमयीमिवाग्निम
मियोत्सन्ननिद्रा तथैव क्षितितले विचेष्टमाना रेणुकणधू
रश्रुजलार्द्रकपोलसन्दानितैर्विमुक्तव्याकुलैः शिरोरुहैरुपरुद्ध

निर्दयाक्रन्दगर्भगद्गदपदयामेव कण्ठेन तस्मिन्नेव सरस्तीरे तरलिकाद्वितीया क्षपां क्षपितवती ।

प्रत्यूषसि उत्थाय तस्मिन्नेव सरसि स्नात्वा कृतनिश्चयया तत्प्रीत्या तमेव कमण्डलुमादाय तान्येव च वल्कलानि तामेवाक्षमालां गृहीत्वा बुद्ध्वा निःसारतां संसारस्य, ज्ञात्वा च मन्दपुण्यतामात्मन ,निरूप्य चाप्रतीकारदारुणतां व्यसनोपनिपातानाम्, आकलय्य दुर्निवारतां शोकस्य, दृष्ट्वा च निष्ठुरतां दैवस्य, चिन्तयित्वा चातिबहुलदुःखतां स्नेहस्य, भावयित्वा चानित्यतां सर्वभावानाम्, अवधार्य चाकाण्डभङ्गुरतां सर्वसुखानाम्, अविगणय्य तातमम्बां च, परित्यज्य सह परिजनेन सकलबन्धुवर्गं, निवर्त्य विषयसुखेभ्यो मनः, संयम्येन्द्रियाणि गृहीतब्रह्मचर्या देवं त्रैलोक्यनाथमनाथशरणमिमं शरणार्थिनी स्थाणुमाश्रिता । अपरेद्युश्च कुतोऽपि समुपलब्धवृत्तान्तस्तातः सहाम्बया सह बन्धुवर्गेणागत्य सुचिरं कृताक्रन्दनैर्दयाभिरभ्यर्थनाभिश्च बहुभिरपरैश्चानेकप्रकारैः परिसान्त्वनैश्च नानाविधैर्गृहागमनाय मे महान्तं यत्नमकरोत् । यदा च नैवमस्माद्व्यवसाया-त्कथञ्चिदपि शक्यते व्यावर्तयितुमिति निश्चयमभिगतवांस्तदा निराशोऽपि दुस्त्यजतया दुहितृस्नेहस्य पुनः पुनर्मया विसृज्यमानोऽपि बहून्दिवसानिवसन् सशोकः यथागतं समानहृदयो गृहानयासीत् । गते च ताते ततः प्रभृति तस्य जनस्याश्रुमोक्षणमात्रेण किल कृतज्ञतां दर्शयन्ती तदनुरागकृशमिदमपुण्यबहुलमस्मिन्नाश्रमस्थलभूतमनेकक्लेशायासहृदयनिराशं बहुविधैर्नियमशतैः क्षपयन्ती वन्यैः

जपव्याजेन तद्गुणगणानिव गणयन्ती त्रिसन्ध्यमत्र सरसि स्नानमुपस्पृशन्ती प्रतिदिनमर्चयन्ती देवं त्र्यम्बकमस्यामेव गुहायां तरलिकया सह दीर्घशोकमनुभवन्ती चिरमवसम् । साहमेवंविधा पापकारिणी निर्लक्षणा निर्लज्जा क्रूरा च निःस्नेहा च नृशंसा च गर्हणीया निष्प्रयोजनोत्पन्ना निष्फलजीविता निरवलम्बना निःसुखा च । किं मया दृष्टया पृष्टया वा कृतब्राह्मणवधमहापातकया करोति महाभागः ।

——:o:——

श्रेणि is significant, implying the flight or flying state of the flamingoes, and thus connecting them with the sky. Flamingoes, with the poet's convention, migrate to the lake Manasa during the rains when water on the planes is turbid and return with the clearing of the water in autumn, and it is this returning that is meant by the flight in question For the flight of such birds in rows cf श्रेणीबन्धाद्वितन्वद्भिरस्तम्भां तोरणस्रजम् । सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ ॥—R I 41

S 20 इक्षुच्छाय°—Expound इक्षूणां छाया, the compound being neuter by छाया बाहुल्ये (P II. 4. 22). The reading इक्षुच्छाया° should be construed as इक्षुच्छाय + आ°, for the simple reason that no perceptible shade can be offered by a single sugarcane, in which case alone छाया can retain its feminine form. गुणोदयम्—A बहुव्रीहि Expound गुणेभ्य उदयो यस्य तत् Prompted by his virtues आकुमारकथोद्घातम् "आ कुमाराद् आकुमारं प्रभृति कथोद्घातं कथाप्रस्तावः । इक्षुविकारेक्षणादिः । स विद्यते यस्य तत् ।"—Vallabha. शालिगोप्यः—Peasant girls watching rice fields

S 21 The words प्रससाद and चुक्षुभे carry each a second sense in their implied connection with मनः and अम्भः respectively The limpidness of water in autumn is traditionally connected with the rise of the star Canopus (अगस्त्य)

S 22. मदोदग्राः—Wild with rut. कूलमुद्रुजाः—कूलान्युद्रुजन्तीति । 'उदि कूले रुजिवहोः' इति खश्प्रत्ययः । लीलाखेलम्—'विलासगमनम्'—Mallinatha अनुप्रापुः—Imitated. महोक्षाः—उक्षन् (a bull) preceded by महत् and वृद्ध in a कर्मधारय gets the समासान्त टच् The epithets (in the first half) in their application to रघु may be modified respectively, after M., as मदोद्धतः, प्रधानः and परमुद्रुजः.

च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन दीर्घः सर्वेष्वपरविद्याबोधेषु-
नयोरन्ध एव अनुदर्शनेऽप्यसामर्थ्यात्। D. K. VIII. आकेकर—
अर्धेऽपि काणे तृतीया like चाक्षुषेण धनवान्. The meaning is that he was fair-eyed with a deep insight into science.

S. 14. पार्थिवश्रीः—Royal splendour (पार्थिव = a king).

S. 15. प्रतापः—Means both 'heat' and 'glory.' व्यानशे—Pervaded. A लिट् form (third person, singular) of अश् with वि.

S. 16. वार्षिकं धनुः—The rainbow. संजहार—Withdrew. जैत्रम् (जेतृ+अण्)—Victorious. पर्यां. .कौ—Wielding their bows by turns.

S 17 The compounds in the first half will, with विमलविकसिताम्, be construed with तम् as well, and the components in the two cases will stand respectively in the relations of identity and comparison, identity in the case of ऋतु· and comparison in the case of तम्.

S. 18. चक्षुष्मताम्—Of those having eyes (i e with power to enjoy a beautiful sight).

S. 19. The implication of the verse is that Raghu's fame pervaded the three worlds—भूर्, भुवर् and स्वर्, and this can be brought out thus The whiteness of the lilies flamingoes and stars is ascribed poetically to the influence of Raghu's fame (fame being poetically white). This presupposes the coherence of the fame with those objects and coherence (of course simultaneous) of a thing with objects in different regions can only mean its coextension with those regions. The point why other objects in the same regions were not similarly influenced by the fame will find its explanation in a law by which response is possible from objects that have a capacity for it . कुमुद्वत्सु—The word

[illegible] is significant, implying the flight or flying state of the flamingoes, and thus connecting them with the sky. Flamingoes, with the poet's convention, migrate to the lake Mânasa during the rains when water on the planes is turbid and return with the clearing of the water in autumn, and it is this returning that is meant by the flight in question For the flight of such birds in rows cf श्रेणीबन्धाद्वितन्व-द्भिरस्तम्भां तोरणस्रजम्। सारसैः कलनिर्ह्रादैः क्वचिदुन्नमिताननौ॥—R. I 41

S 20. इक्षुच्छाय°—Expound इक्षूणां छाया, the compound being neuter by छाया बाहुल्ये (P. II. 4. 22). The reading इक्षुच्छाया° should be construed as इक्षुच्छाय + आ°, for the simple reason that no perceptible shade can be offered by a single sugarcane, in which case alone छाया can retain its feminine form. गुणोदयम्—A षष्ठीत॰. Expound गुणेभ्य उदयो यस्य तत् Prompted by his virtues आकुमारकथोद्घातम् "आ कुमारात् बाल्यात् प्रभृति कथोद्घाताः कथाप्रस्तावाः। इक्षुविषयेष्वाति:। स विद्यते यस्य तत्।"—Vallabha. शालिगोप्यः—Peasant girls watching rice fields

S. 21 The words प्रससाद and चुक्षुभे carry each a second sense in their implied connection with मनः and अम्भः respectively. The limpidness of water in autumn is traditionally connected with the rise of the star Canopus (अगस्त्य)

S. 22 मदोदग्राः—Wild with rut. कूलमुद्रुजाः—कूलान्युद्रुजन्तीति। 'उदि कूले रुजिवहोः' इति खश्प्रत्ययः। लीलाखेलम्—'विलासगमनम्'—Mallinātha. अनुप्रापुः—Imitated. महोक्षाः—उक्षन् (a bull) preceded by महत् and वृद्ध in a समास gets the समासान्त टच्. The epithets (in the first half) in their application to रघु may be modified respectively, after M., as दर्पोद्धतः, ककुद्मतः and पराभवकृत.

S. 23. मदापगितविमि:—A बहुव्रीहि. 'दयमानाश्च' इति समासान्त इकार:। पृथग्ग—'करात्कटाभ्यां मेढ्राच्च नेत्राभ्यां च मदसृति:' इति पालकाप्ये. The discharge through all the seven outlets points to the superior breed of Raghu's elephants.

S. 24. गाधा:—Fordable, shallow. आश्यान—Dried. शक्ते: प्रथमम्—The foremost (constituent) of the (three-fold) regal power. The three constituents are प्रभाव (majesty), मन्त्र (ministry) and उत्साह (army). The facilities offered by autumn acted as an incentive to Raghu's expedition.

S. 25. नीराजना—'नीरस्य (शान्त्युदकस्य) अजनं (क्षेप) अत्र नीराजनम् आरात्रिकमित्यर्थ: । तत्सम्बन्धिनी राज्ञाः प्रयाणपूर्वी नीराजनाविधिं कुर्वन्तीत्याशय:'—Sumativijaya. प्रदक्षिण ..रर्ची—"इद: प्रदक्षिणगतो हुतभुक्स्त्रग्मरवाभो समृद्धयेनं बयानं करोति।" इत्युक्तप्राशस्त्ययाशयाम्"—M.

S. 26. गुप्तमूलप्रत्यन्त:—Having guarded the metropolis (मूल) and the frontier (प्रत्यन्त). गुप्तपार्ष्णि:—'अनुचरादाहतु: सेनया रक्षितपृष्ठभागो वा'—Mallinatha. अयात्रिक:—Attended by an auspicious rite. "अथ: शुभावहो विधि:"—अमर:। षड्विधं बलम्—'मौलं भृत्य· सुहृच्छ्रेणी द्विषदाटविकं बलम्।'—इत्यमर:।

S. 27 वृद्धाश्रिता:—It is not necessary that the strewing should be made always by elderly women on such occasions. Thus—अवाकिरन् बाललता: प्रसूनैराचारलाजैरिव पौरकन्या:।—Raghu. II. 10. The word लाज is always used in the plural. The second half of the verse contains an allusion to समुद्रमन्थन. ग्राहे—क्रियुमि:.

S. 28 तृणवत् शार्दूलनर्दित—The तृणवत् referred to was already tested by Raghu's encounter with Indra in canto III. (शार्दूलनर्दित—a name of Indra). अभिभाव..केतुभि:—

For, the wind being favourable the flags pointed towards the front. अरिः—An enemy.

S. 29 Cf 'चलमाना विलग्नाः शिविरमध्यगताहितं तत्रवृत्तेः'—Raghu XVI. 28. Strict conformity to order would demand sameness of words in पुरस्तात् and पृष्ठतः.

S. 30 Raghu's majesty, his army din, the dust raised by his army and the army itself with its four constituents of elephant, horse, chariot and foot, formed, as it were, four successive battalions of his advancing army. The meaning is that each one of these was potent enough to stupefy the enemy. The order is note-worthy, being in conformity to science—first the subtlest, next what is grosser than the one, next what is still grosser and last the grossest. The wind, it should be noted, was favourable as is conventionally the case, which accounts for the din and the dust travelling in the enemy's direction.

S. 31 उदम्भांसि—Rich in water. नाव्याः—Navigable. सुप्रतराः Lastly fordable. प्रकाशानि "निर्वृक्षाणि"—M. शक्तिमत्त्वात्—शक्तिः ... ( शक्तिमत्त्वादिति ) शक्ति here means his power to rule nature—an effect of his knowledge in consonance with the dictum 'Knowledge is power.'

S. 32 This alludes to the ...

S. 33 The words फलम्, उत्खाता and भग्नैः are used each in a double sense in this śloka. फलम्—(1) Acquisition, (2) Fruit. उत्खाताः—(1) Dethroned, (2) Uprooted. भग्नैः—(1) Vanquished, (2) Broken. रोपिताः &c.—Causal Passive. Process: (1) रुहः (धातुः) कर्ता रोहति (Primitive). (2) रुहः (रोहन्तं ...) रुहान् (... ) कर्ता रोपयति (Causal Active). (3) रुहाः (... ) रुहः (... ) कर्म रोपिताः (Causal Passive).

"स्वमेणिजन्ताद् द्विकर्मकाद्प्रधाने कर्मणि क्तः". The root हस् is गत्यर्थक and hence the change of the primitive subject into an accusative. "गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ"—Panini. उल्वण:—Conspicuous.

S. 34—पौरस्त्यान्—Eastern. "दक्षिणापश्चात्पुरसस्त्यक्" इति त्यक्प्रत्ययः। तांस्तान्—All the various [illegible].

S. 35. वृत्तिमाश्रित्य वैतसीम्—Is equivalent to प्रणम्य वेतसेव. Our poet is fond of drawing similes from the same environment. The present is an instance of this. आत्मा संरक्षितः सुह्मैः—Translate The Suhmas preserved themselves. आत्मन्, when used reflexively, is always singular सुह्मैः—The base is सौह्म (P. IV. 1. 170—जनपदशब्दात्क्षत्रियादञ्) which is reduced for the plural terminations to सुह्म (P. II. 4. 62 तद्राजस्य बहुषु तेनैवास्त्रियाम्). 'प्रणम्य. वेतसा प्रकारेणात्मा रक्षितस्ते'—M. For the idea cf. तृणानि नोन्मूलयति प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः। समुच्छ्रितानेव तरून् प्रबाधते महान् महत्स्वेव करोति विक्रमम्॥

S. 36. वङ्गान्—The base is वङ्ग See note on सुह्मैः above.

S. 37. A striking instance of Kalidasa's drawing similes from the same environment The sloka gives the time when Raghu's conquest of Bengal was complete. It was the time of reaping the autumnal harvest Note the double meanings in आनम्राः, फलैः and उत्खातप्रतिरोपिताः. Applied to the kings, they mean "having bowed down to his lotus feet", "with wealth" and "ousted and reinstated" respectively Applied to the rice plants, they mean "bent down to the [illegible] at the [illegible]", "with corn" and "uprooted and replanted" respectively. कलमानाम्:—Paddy.

S. 38. [illegible]—[illegible]—Who was

shown the way by the उत्कल princes This shows that the Utkala princes had already been conquered by Raghu For the declensional peculiarity in उत्कल see notes on सुह्मैः and वङ्गान् above The base औत्कल is got by P. IV. 1. 168 'जनपदशब्दात् क्षत्रियादञ्।'

S. 39. महेन्द्रम्—A chain of mountains probably identified with the Eastern Ghats. गम्भीरवेदिनः—'त्वग्भेदाच्छोणितस्रावान्मांसस्य क्रथनादपि। आत्मानं यो न जानाति स स्याद् गम्भीरवेदिनः॥' इति राजपुत्रीयः। 'चिरकालेन यो वेत्ति शिक्षां परिचितामपि। गम्भीरवेदी विज्ञेयः स गजो गजवेदिभिः॥' इति मृगचर्मीये।—M.

S. 40 प्रतिजग्राह—Received, i. e. opposed. कालिङ्गः—The plural will be कलिङ्गाः. See notes above (sl. 35,36,38). Here साधन corresponds to सैन्य गजसाधन'—Whose army consisted of elephants. पक्षच्छेद—Mountains, mythologically, were formerly furnished with wings.

S. 41. नाराचदुर्दिनम्—A shower of arrows.

S 42 ताम्बूलीनां दलैः—In (cups made of) betel leaves. This shows that betel creepers grow in abundance in those parts. नारिकेलासवम्—The country is rich in cocoanuts even to this day. The carousal is an indication of complete victory over the enemy.

S 43 धर्मविजयी—One who takes to conquests as a matter of duty. Such a monarch will be satisfied with simply robbing his enemy of his glory, unlike a लोभविजयी who will rob the enemy of his kingdom as well and an असुरविजयी who will further take even the enemy's life. श्रियं . मेदिनीम्—This is an explicit statement of what is implicitly contained in गृहीत.. स्य, for गृहीत implies loss of glory and प्रतिमुक्त would be meaningless if the lost kingdom were not returned. श्री

S 47 ससञ्जु —For the temples were ichory as inferable from the use of तुल्य and मत्त अश्वक्षुण्णानाम्—The above that cardamom grows profusely in those parts. 'एलावनानिष्कुटद्विपमदगन्धि'—M. The significance of the verse probably is that the particles could cause no fresh excitement being of the same smell and made one with the rut. This, like the preceding verse, points to the season being winter then.

S 48 त्रिपदी...नाम्—That were strong enough to break their foot-chains (which, of course, they had none then). नास्रसत्—Did not slip off. This was partially due to the depressions, but mainly to the steadiness brought on the elephants by their enjoyment of the exquisitely delightful smell of the चन्दन trees. The चन्दन forms a special feature of the Malaya mountain. The peculiar fondness of serpents for this tree goes to prove that its smell is agreeable to them.

S 49. दिशि. रवेरपि—This refers to the दक्षिणायन or winter solstice presumably in an advanced stage. The introduction is suggestive of the time of Raghu's arrival in the south.

S 50 ताम्र स्य—The mouth of the ताम्रपर्णी—where it falls into the ocean—abounds in pearls. The white pearls were, so to speak, a visible representation of the fame passing.

S 51-2.—दिश् and वैदिशी in the lines must be construed to refer to the same part of the country.

S 53. The army extending from the foot of the Sahya hill to the sea-shore appeared on account of its vastness like a continuation of the sea itself. The mythology is that परशुराम created the space for his penance.

S. 54. For a similar expression of poetic substitution cf. अनेन पर्यासयताश्रुबिन्दून्मुक्ताफलस्थूलतमान्स्तनेषु । प्रत्यर्पिताः शत्रुविलासिनीनामुन्मुच्य सूत्रेण विनैव हाराः ॥—R. VI. 28.

S. 55. केतकं रजः—The dust of केतक flowers. अयत्नवासिताम्—The condition of a cloth-perfume secured without effort (*i. e.* supplied by nature). वारबाण—A breastplate. Expound : वारबाण हारा:. An irregular तत्पुरुष.

S. 56. वाहानाम्—Of the horses. गात्रशिञ्जितैः—Jingling on the body.

S. 57. सुगन्धिषु—The समासान्त इ is accounted for by the rule 'गन्धस्येदुत्पूतिसुसुरभिभ्यः ।' The use conforms also to the further restriction गन्धस्येत्वे तदेकान्तग्रहणं कर्तव्यम्', गन्ध here being an integral part of the elephants' temples. पुन्नागेभ्यः—ल्यब्लोपे ५ मी (पुन्नागानि विहाय). The form is neuter because flowers are meant here, and not trees.

S. 58. Raghu's conquest of the western princes was in another form his conquest of the ocean. 'अपरान्तानां समुद्रदेशवर्तित्वाच्चैषां करे समुद्रस्यैवोपचारः ।'—M. M.'s further remark—कारागारं च भीत्या न तु याञ्चयेति रामाद्रघोरुत्कर्षः'—is right in the conclusion, but not in the argument. The contrast here is not on the point of prayer and fear, but on the point of space and tribute, or loss of possession and loss of liberty. The reading अभ्यर्थितः does not consist with रामास्त्रोत्सारितः above (sl. 53), which latter accords with the mythology. Could it be अभ्यर्दितः?

S. 59—रदन—A tusk. "गात्रप्रहारविद्रुतैर्द्विपोत्कीर्णदन्तवन्मध्ये सर्वोर्ध्वपक्षपक्षोऽस्तृरिवदं:'—M. Cf. Vikramānka. I. 65—युद्धेषु भूपतिभिः सकोपं योधांसलग्नाशिखितशिलायः । कलिन्द्र[illegible] ... इव विभ्रमयति ॥

)}

S. 60. From this description are we to learn that Persia formed part of ancient India? स्थलवर्त्मना—By land route The specification shows that जलवर्त्म or sea-route also was possible, but the other was preferred as more expedient. In the case of internal foes—the senses—self-abnegation also might be a means, but the surer is तत्त्वज्ञान M.'s remark that the sea-route, though shorter, was rejected because of the prohibition of sea-voyage (अद्य नैदैवात्रि अज्ञपेत । समुद्रयात्रस्य निषिद्धत्वात् ) is hardly tenable, for the prohibition applies to the present age (कलि) whereas the picture here is of त्रेता.

S 61. बालातपम्—The restriction बाल is necessary, it being the morning sun that gives a reddish bloom to the lotus. It also suggests the youthfulness of the ladies. अकाल°—The preclusion of the rainy season is needed for the admission of lotuses The meaning of the verse is that Raghu's invasion resulting in the death or imprisonment of their husbands took off all joy or merry-making from the ladies hearts, and brought a gloom to the bloom on their faces For a similar idea cf. वैरस्त्रीणामरस्वानां सहास-विलासिनः । दैत्यमित्रवैनतायिरिद्धोरिवणवक्वम् ॥ R. X. 12.

S 62. धाड्क बोधे—In which the opponents could be known only by the twangs of their bows. This shows that Raghu was a शब्दवेधिन् रजसि—The dust was caused by the hoofs of the horses on which they fought.

S. 63. भल्लापवर्जितैः—Severed with arrows. सरघा—A honey bee. क्षौद्रपटलैः—With honeycombs.

S 64. शिरस्त्राण—A helmet. अपनीत···स्राः——As a mark of humility. संरम्भः—Anger. प्रणिपात····स्वरम्—"हरतां पार्थिव-दस्युमैवाहर्त्तं न तु भौलिकमिति भावः"—M.

S. 65. विनयन्ते स्म—Removed. 'खर्जूरी… मधुभिः—With wine,—probably prepared from grapes… which those parts are well-known. आस्तीर्ण…रत्नासु—रत्न means 'the best.' 'जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते'. Is… an indication that the most excellent deer skins are… in those parts? द्राक्षा…भूमिषु—Shows that the land abounds… in plots of vineyards. It was probably the advent of summer… the season for grapes.

S. 66. प्रतस्थे—'…' इत्यावनेतरम् कौबेरीं दि…—A periphrasis for the north. भास्वानिव—A happy simile… it was undoubtedly उत्तरायण or summer solstice at the… presumably in an advanced stage. उस्रैः—By rays.

S. 67. लग्नकुङ्कुम°—Kishmir is well-known for… This flowers is summer, which shows the time when Ragh… arrived there.

S. 68. अवरोध—The seraglio. The meaning of the… is that excess of grief at the loss of their husbands mad… them merciless on their persons and the roughness produce… unwelcome rosiness on their cheeks. For a similar idea c… 'करुणं नयनाम्बुसिक्तं कपोलं … मोऽस्तर्धि… …ताम् ॥'—सोमप्रभस्य ।

S. 69. अनीश्वराः—Unable. The bending of the st… walnut trees indicates the gigantic strength of Ragh… elephants. The walnut is peculiar to North India.

S. 70 उपदा—A present. नोत्सेकाः—Not (their) pr… This means that the Kāmbojas were a conceited peop… and though their pride had been completely quelled… Raghu, the latter was never puffed up.

S. 71 गौरीगुरुं शैलम्—A periphrasis for हिमवन्तम्. …रेणुभिः—The flying of the metallic dusts indicates the …

stiffness of the hoofs of Raghu's horses The illusion finds justification in the sameness of constituents.

S 72 तुल्यप्रभावाम्—Of equal strength. Lions are well mentioned here, as forming a special feature of the Himalayan forests.

S 73. The breezes served him on the way as attendants would do at the palace. The idea is that the tediousness of the journey was not felt on account of the gentle breezes. The qualifying expressions suggest gentleness, amusingness and coolness respectively. The भूर्ज and the कीचक are peculiar to the Himalayan side The Ganges also has its origin there.

S. 74. दृषदः—Rocks Object to अध्यास्य by the rule 'अधिशीङ्स्थासां कर्म'. वासितोत्सङ्गाः—Whose surface was scented. From this we know the deer to be musk deer (कस्तूरीमृग). नि—भि:—Expound निषण्णानां मृगाणां नाभिभिः. निषण्ण—Sitting.

S. 75 ग्रैवेय—A chain or fetter for the neck नक्तम्—At night. अतैलपूराः दीपिकाः—Lamps without oil. Cf. above (sl 55)

S. 76. वर्ष्म—(Here) height It means the body also "वर्ष्म देहप्रमाणयोः" इत्यमरः The Kiratas had scattered through panic during Raghu's invasion and so did not see his elephants. The implication of the verse is that Raghu's elephants surpassed in height even the wild elephants of the Himalayas. देवदारु trees abound in the Himalayas.

S. 77. जन्यम्—A fight. क्षेपणीय—A kind of missile.

S. 78. उत्सवसङ्केतान्—The गणs referred to in the preceding verse. They are seven in number. "गणाः उत्सवसङ्केताख्याः

